CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह. नं. १६८०९

१५३

पृ. १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनकराज १८६४

॥वं॥ ॥१॥

श्रीगणेशाय नमः॥ ॥श्रीसरस्वत्यै नमः॥ ॥श्रीगुरुभ्यो नमः॥ श्रीवेदपुरुषाय नमः॥ श्रीमहा
कालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः॥ ॥अथ ॐ नवसूत्रिकायै॥ ॥अविघ्नमस्तु॥
ॐ नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम्। देवताभ्यर्चनं चैव समिधादानमेव च॥
॥१॥ अस्नातस्तु पुमान्नार्हो जपाग्निहवनादिषु॥ स्नातोऽधिकारी सर्वत्र दैवे पित्र्ये च कर्मणि।
॥२॥ अत्यंतमलिनः कायो नवच्छिद्रसमन्वितः। स्रवत्येष दिवारात्रौ प्रातःस्नानेन शुध्यति
॥३॥ प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः॥ यतीनां तु त्रिषवणं सकृत्तु ब्रह्मचारि- ॥राम॥ ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विन्न

णाः ॥ ४ ॥ मृत्तिलं गोमयं दूर्वाः पुष्पाणि सुरभीणि च ॥ आहरेत्स्नानकाले तु स्नानार्थं प्रयतः शुचिः

॥ ५ ॥ विना दर्भैश्च यत्स्नानं यच्च दानं विनोदकम् ॥ असंख्यातं च यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥ ६ ॥

नभस्येमास्यमावास्यातिथौ दर्भाश्च ये मताः ॥ अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः ॥ ७ ॥ ग

तैरकाजम्बिन्यस्य मृत्तिकादि यथाविधि ॥ आचम्य [illegible]रे प्रस्नात्वा द्विधा कुर्यान्मृदं ततः ॥ ८ ॥ गो

मयं च तथा कृत्वा स्नायाच्छास्त्रोक्तमार्गतः ॥ संध्यादिकं विधायाथ स्तोत्रपाठादिकं चरेत् ॥ ९ ॥ ॐ

न मृव शिउकाये ॥ आचम्य प्राणायामं कुर्यात् ॥ ॐ अस्य [illegible] न वार्रामञ्चमप्रलविसुमहे स्व

॥२॥

[illegible]गायत्रित्रिष्टुबनुष्टुप्छंदांसिमहाकालीमहालक्ष्मीमहासरस्वत्योदेवताःनंदाशाकम्भरीभीमाःशक्त
योरक्तदन्तिकाभीमा[illegible]म[illegible]बीजानिअग्निवायुसूर्यास्तत्वानिअ[illegible]जपेवि[illegible]योगः ॐ ब्रह्म
विष्णुशिवेभ्योनमःशिरसि॥गायत्रीत्रिष्टुबनुष्टुप्छन्दोभ्योनमोमुखे॥महाकालीमहाल
क्ष्मीमहासरस्वतीदेवताभ्योनमोहृदि॥नन्दाशाकम्भरीभीमाशक्तिभ्योनमोदक्षहस्ते॥रक्त
दन्तिकाभीमाभ्रामरीबीजेभ्योनमोवामहस्ते॥अग्निवायुसूर्येभ्योनमोहृदि॥ ॐ ऐं ह्रीं क्लीं चा
मुण्डायैविच्चे॥इतिमूलेनकरौसंशोध्य॥ ॐ ऐं अङ्गुष्ठाभ्यांनमः॥ ॐ ह्रीं तर्जनीभ्यांनमः॥

CC-0. In Public Domain. Digitization by eGangotri

ॐ क्लीं मध्यमाभ्यां नमः॥ ॐ वामुराज्ञायै अनामिकाभ्यां नमः॥ ॐ विघ्नेकनिष्ठिकाभ्यां नमः॥ ॐ
ऐं ह्रीं क्लीं वामुराज्ञायै विघ्ने करतलकरपृष्ठाभ्यां नमः॥ इति करन्यासः॥ ॐ ऐं हृदयाय नमः॥ ॐ
ह्रीं शिरसे स्वाहा॥ ॐ क्लीं शिखायै वषट्॥ ॐ वामुराज्ञायै कवचाय हुं॥ ॐ विघ्ने नेत्रत्रयाय वौ
षट्॥ ॐ ऐं ह्रीं क्लीं वामुराज्ञायै विघ्ने अस्त्राय फट्॥ इति षडङ्गन्यासः॥ ततो अक्षरन्यासः॥ ॐ ऐं नमः
शिरसि॥ ॐ हुं [illegible] नमो दक्षनेत्रे॥ ॐ क्लीं नमो वामनेत्रे॥ ॐ वां नमो दक्षकर्णे॥ ॐ मुं नमो वाम
कर्णे॥ ॐ डां नमो दक्षनासायां॥ ॐ यैं नमो वामनासायां॥ ॐ विं नमो मुखे॥ ॐ घ्नें नमो गुह्ये॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥
॥ २ ॥

एवंविन्यस्य अष्टवारं मूलेन व्यापकं कुर्यात् ॥ ॐ ऐं प्राच्यै नमः ॥ ॐ ऐं आग्नेय्यै नमः ॥ ॐ ह्रीं दक्षि
णायै नमः ॥ ॐ ह्रीं नैरृत्यै नमः ॥ ॐ क्लीं प्रतीच्यै नमः ॥ ॐ क्लीं वायव्यै नमः ॥ ॐ चामुण्डायै उ-
दीच्यै नमः ॥ ॐ विच्चे ईशान्यै नमः ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऊर्ध्वायै नमः ॥ ॐ ऐं ह्रीं क्लीं
चामुण्डायै विच्चे भूम्यै नमः ॥ ततो ध्यानम् ॥ खड्गं चक्रगदेषुचापपरिघाञ्छूलं वे ॥ भु
शुण्डीं च शिरः शङ्खन्दधतीं त्र्यम्बकाम् ॥ १ ॥ नामसीरपामलां नौमि महाकालीन्दशास्त्रिका
म् ॥ मालाञ्च परशुं बाणान् गदां कुलिशमेव च ॥ २ ॥ पद्मं धनुः कुण्डलिकान् दण्डं शक्तिमसिं

॥ रामः ॥
॥ ३ ॥
3

तया॥खेटकंजलजंघण्टांसुधापात्रंचशूलकम्॥३॥पाशंसुदर्शनंचैवदधतींलोहितप्रभाम्
पद्मस्थितांमहालक्ष्मींभजेन्महिषमर्दिनीम्॥४॥घण्टांशूलंहलंशंखंमुशलारिधनुःशा
रान्॥दधतींसुजलांनोमिगिरिदेहसमुद्भवाम्॥५॥इतिध्यात्वामंत्रोपचारैःसंपूज्यजपेत्॥ॐ नं३
ऐंह्रींक्लींचामुण्डायैविच्चे॥इतिमूलमंत्रः॥१०८॥अष्टोत्तरशतंजप्त्वावाह्यपूजां[illegible]त्वासप्तशतींप
ठेत्॥संख्यापूर्वो[illegible]पुनर्मूलमष्टोत्तरशतंप्रतिदिनंजपेत्॥इतिनवार्णमंत्रविधानंसंपूर्णम्॥ ॥
अथसप्तशतीशापविमोचनम्॥प्रणवंपूर्वमुद्धृत्यमायाबीजंततःपरम्॥मायाकामंततःक्रोधंता

॥ चं ॥
॥ ५ ॥

ऐंवाग्भवसंयुतम्॥ क्षोभं मोहं ततःपश्चात्कीलयेत्तित्रिभिर्वदेत॥ ॐ ह्रीं ह्रूं क्लौं हूं ॐ ऐं क्षोभय२
मोहय२ कील य२ स्वाहा॥ इतिसप्तशती शापविमोचनम्॥ श्रीमन्मुरामुरराध्यवरशांभो
रुहद्वयीम्॥ चराचरजगद्धात्रीं चण्डिकाम्प्रणमाम्यहम्॥ शिरोरक्षतु ब्रह्माणी मुखं माहेश्वरी त
था॥ कौमारी हृदयं रक्षेदुदरं वैष्णवी तथा॥ वाराही चकटीं रक्षेदैन्द्री चोरू सदा मम॥ चामुण्डा
जानुदेशं तु पादौ रक्षतु चण्डिका॥ स्फुकाटीकामुजौ पृष्ठं रक्षापारसुजानना॥ अङ्गप्रत्यङ्गसन्धीं
श्च सर्वाः रक्षन्तु मातरः॥ ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः॥ सनः पर्षदति दु
र्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः॥ इतिमूलमंत्रः॥ जातशिखायां॥ वेदसे ललाटे॥ सुन-

॥ रामः ॥
॥ ५ ॥

5

वामकर्णयोः॥ सोमंनासिकायां॥ अरातीवस्तुसोः॥ पत ओष्ठयोः॥ निदहातितालुनिवेदजिह्वा-
याम्॥ सःग्रीवायां॥ नःबाहोः॥ पर्षत्हृदि॥ अतिस्तनयोः॥ दुःकुक्षौ॥ गाणिनाभौ॥ विश्वापृष्ठे॥ ना-
वायारयोः॥ इवहस्तरायोः॥ सिंधुंशिश्ने॥ दुःकधाम्॥ रितउर्वोः॥ अतिजंघयोः॥ अग्निःपादयोः॥ इति
न्यासंकृत्वा॥ पूजाकार्या॥ ॐ जातवेदसेसुनवामअंगुष्ठाभ्यांनमः॥ सोमरातीयतेर्जनीभ्यांस्वाहा म४
निदहातिवेदमध्यमाभ्यांवषट्॥ सनःपर्षतिदुर्गाणिअनामिकाभ्यांहुं॥ विश्वानावेवसिन्धुमकनि-
ष्ठिकाभ्यांवौषट्॥ दुरितात्यग्निःकरतलकरपृष्ठाभ्यांफट्॥ ॐ जातवेदसेसुनवामहृदयायनमः॥
म१ सोमरातीयतःशिरसेस्वाहा॥ निदहातिवेदःशिखायैवषट्॥ सनःपर्षदतिदुर्गाणिकवचायहुं॥ वि-

॥ वे ॥
॥ ५ ॥

स्वानावेवसिंधुमनेत्रत्रयाय वौषट् ॥ दुरितात्मग्निः अस्त्राय फट् ॥ अथ पूजान्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां
नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ॐ ह्रौं कनिष्ठिका
भ्यां नमः ॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥ ॐ ह्रां हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ ह्रूं शिखायै
वषट् ॥ ॐ ह्रैं कवचाय हुं ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥ ॐ ह्रः अस्त्राय फट् ॥ इति न्यासान्कृत्वा पूजा का
र्य्या ॥ ॐ ह्रीं श्रीं गणपतये नमः ॥ ॐ ह्रीं श्रीं क्षेत्रपालाय नमः ॥ ॐ ह्रौं श्रीं तीक्ष्णशृंगाय महिषाय न
मः ॥ ॐ ह्रीं श्रीं वनस्पतिपुत्राय सिंहाय नमः ॥ इति द्वा पूजा ॥ ॐ गुं गुरवे नमः ॥ ॐ पं परमगुरवे नमः
ॐ पं परमेष्ठिने नमः ॥ ॐ पं परमाचार्याय नमः ॥ ॐ आदिसिद्धेभ्यो नमः ॥ इति गुरुपूजा ॥ ॐ ह्रौं श्रीं

॥ राम ॥
॥ ५ ॥

विल्वेनम ॥ ॐ ह्रौं श्रीं वैल्लवैन्नेनमः ॥ ॐ ह्रौं श्रीं रूद्रायनमः ॥ ॐ ह्रौं श्रीं रूद्राण्येनमः ॥ ॐ ह्रौं श्रीं
ब्रह्मणेनमः ॥ ॐ ह्रौं श्रीं ब्रह्माण्येनमः ॥ इतिपूर्वे ॥ ॐ ह्रौं श्रीं कौमार्य्यैनमः ॥ ॐ ह्रौं श्रीं स्कंदेनमः
॥ ॐ ह्रौं श्रीं नारास्येनमः ॥ इत्युत्तरे ॥ ॐ ह्रौं श्रीं वराहीकायेनमः ॥ ॐ ह्रौं श्रीं चामुण्डायेनमः ॥ ॐ ह्रौं श्रीं
महालक्ष्म्येनमः ॥ इतिपश्चिमे ॥ ॐ ह्रौं श्रीं चामुण्डायेनमः ॥ ॐ ह्रौं श्रीं वराहमूर्त्येनमः ॥ इतिदक्षि
णे ॥ ॐ ह्रौं श्रीं मः नमोभगवतिमहादुर्गे चण्डिकाकात्यायनिनमः ॥ इतिमूलमंत्रं ॥ ॐ नमः पिशि-
ताशिनि किलि त्रिशूलखड्गहस्ते सिंहारूढे एहि २ आगच्छ २ वलिपूजां गृह्ण २ सिद्धिं कुरु २
ॐ ह्रौं श्रीं चण्डिकायेनमः ॥ इत्यावाहने ॥ ॐ ह्रौं श्रीं विंध्यवासिन्येनमः ॥ ॐ ह्रौं श्रीं भीमायेनमः
ॐ ह्रौं श्रीं रक्तदंतिकायेनमः । ॐ ह्रौं श्रीं शताक्ष्येनमः । ॐ ह्रौं श्रीं शाकंभर्येनमः

।। चे ।। ॐ ह्रां श्रीं भ्रामर्यै नमः ।। इत्यावरणं ।। ॐ ह्रीं श्रीं चामुण्डे पाद्यं गृहाण नमः अर्घं गृहाण नमः
।। ६ ।। धूपं दीपं गन्धं पुष्पाक्षतान् नमः ।। ॐ ह्रीं श्रीं चण्डिके चामुण्डे गणपति क्षेत्रपाल सहिते
बलिं गृह्ण २ नमः ।। क्षलपालाय क्षेत्रपालाय नमः ।। अनेन विधिना यस्तु पूजयित्वा च वाचये
त् ।। तस्मै देव्यः प्रयच्छंति वितरंति महद्धनम् ।। अनेना विधिना यस्तु विहीनं पुस्तकं पठे
त् ।। तस्य जप्यं भवेद्व्यर्थं मरणाये रुदितं यथा ।। ददाति विपुलां सिद्धिं ददाति विपुलं धन
म् ।। यो जपेत्तस्य हृद्भिः स्यात्सोमप्याप्नोति शाश्वतम् ।। पुस्तकं सम्प्रशस्तिकमनेन विधिनार्चये 6
त् ।। सर्वान् कामानवाप्नोति रुद्रस्य वचनं यथा ।। इति पूजाविधानं संपूर्णम् ।। ।। अथ देवीक

।। राम: ।।
।। ६ ।।

वचं लिख्यते ॥ ॐ अस्य श्रीदेवीकवचमंत्रस्य पितामह ऋषिः अनुष्टुप्छंदः महाकालीदेवता ॐ ऐं बी
जम् ह्रीं शक्तिं क्लीं कीलकं महाकालीप्रीत्यर्थे जपे विनियोग ॥ कवचस्य ऋषिर्ब्रह्मा छन्दोनुष्टुप्
प्रकीर्तितः ॥ देवता जगतान्धात्री महाकालिति विश्रुता ॥ अथ ध्यानम् ॥ सृष्टौ संस्थापनायत्वं पह
रणाविधौ मोहने रुग्गृहेपि सर्वेषामर्गलानां निजमहिमवशात् क्रमेरीव जालम् ॥ नित्यं क्रीडाप्रस
प्र३ क्तारत्वपति सकलं स्वात्मतत्त्वं पवंमानः स्त्वाराणामभ्यापदभिमतफलदा भद्रकाली च काली ॥ १ ॥ ॐ नम
श्चण्डिकायै ॥ तपस्यन्तं महात्मानं मार्कण्डेयं महामुनिम् ॥ व्यासशिष्यो महातेजा जैमिनिः परिपृ
च्छति ॥ १ ॥ जैमिनिरुवाच ॥ महर्षे कथयोत्पत्तिं चण्डिकायाः सुविस्तरम् ॥ ययासर्वमिदं व्याप्तं त्रैलो

॥चं॥
॥८॥

कं मतवगनवरम् ॥२॥ मार्कण्डेय उवाच ॥ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् । यन्न कस्यचिदाख्या-
तं तन्मे ब्रूहि पितामह ॥३॥ ब्रह्मोवाच ॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं । देव्यास्तु कवचं पु-
ण्यं तच्छृणुष्व महामुने ॥४॥ प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी । तृतीयं चन्द्रघण्टेति कूष्मा-
ण्डेति चतुर्थकम् ॥५॥ पंचमं स्कन्दमातेति षष्ठं कात्यायनीति च । सप्तमं कालरात्री च महागौरी-
ति चाष्टमम् ॥६॥ नवमं सिद्धिदा प्रोक्ता नवदुर्गाः प्रकीर्तिताः । उक्तान्येतानि नामानि ब्रह्मणैव म-
हात्मना ॥७॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे । विषमे दुर्गमे चैव भयार्ताः शरणं गताः
॥८॥ न तेषां जायते किंचिदशुभं रणसंकटे । नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥९॥ ये

॥राम॥
॥८॥
7

स्तुभक्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते ॥ प्रेतसंस्थातु चामुण्डा वाराही महिषासना ॥ १० ॥ ऐन्द्री
गजसमारूढा वैष्णवी गरुडासना ॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ ११ ॥ ब्राह्मी हं-
ससमारूढा सर्वाभरणभूषिता ॥ लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥ १२ ॥ श्वेतरू-
पधरा देवी ईश्वरी वृषवाहना ॥ इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ॥ १३ ॥ नानाभरणशो-
भाढ्या नानारत्नोपशोभिताः ॥ नानाउधसमायुक्ता नानायुधसमन्विताः ॥ १४ ॥ नाशयेत्सर्व-
दुःखानि देवी हृदयसंस्थिता ॥ श्वेतसिंहासनारूढा मत्तमातंगगामिनी ॥ १५ ॥ सारथिर्ब्रह्मभव
ड्ला चायुधं च महेश्वरः ॥ विष्णुर्महारथो देव्या भद्रकाल्या महाशयः ॥ १६ ॥ वज्रमाल्या वृता देवी

॥ चं ॥
॥ ५ ॥

घराटामरणाभूषिता ॥ ग्रैवेयरत्नमौक्तिकैः सर्वादिव्यहारप्रलंबिभिः ॥ १७ ॥ इंद्रनीलैर्महानीलैः प
द्मरागैः सुशोभनैः ॥ वैडूर्यैर्घैर्महोल्केश्चैर्नानारत्नसमन्विताः ॥ १८ ॥ दत्तपन्ने रथमारूढा देव्यः
क्रोधसमाकुलाः ॥ शंखं चक्रं गदां शक्तिं हलं च मुशलायुधम् ॥ १९ ॥ खेटकं तोमरं चैव परशु
म्पाशमेव च ॥ शारंचर्मत्रिशूलं च पट्टिशं मुशलां तथा ॥ २० ॥ कुंतायुधं त्रिशूलं च शार्ङ्गमा
युधमुत्तमम् ॥ दैत्यानां देहनाशाय भक्तानामभयाय च ॥ २१ ॥ धारयंत्यायुधानीत्थं देवानां
च हिताय वै ॥ नमस्ते स्तु महारौद्रे महाघोरपराक्रमे ॥ २२ ॥ महाबले महोत्साहे महाभयविना
शिनि ॥ त्राहि मां देवि दुःप्रेक्ष्ये शत्रूणां भयवर्द्धिनि ॥ २३ ॥ प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्नि

8

॥ राम: ॥
॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

देवता॥ दक्षिणे चैव वाराही नैरृत्यां खड्गधारिणी॥२४॥ प्रतिच्यां वारुणी रक्षे वायव्यां मृगवाहिनी
॥ रक्षेदुदीच्यां कौमारी ईशान्यां खड्गधारिणी॥२५॥ ऊर्द्ध्वं ब्राह्मी च मे रक्षेदधस्ताद्वैष्णवी तथा॥ एवं
दशदिशो रक्षेच्चामुण्डा शववाहना॥२६॥ जया मे चाग्रतः पातु विजया पातु पृष्टतः॥ अजिता वाम
पार्श्वे तु दक्षिणे चापराजिता॥२७॥ शिखामुद्योतिनी रक्षे उमा मूर्द्ध्नि व्यवस्थिता॥ मालाधरी ल-
लाटे तु भ्रुवोर्मध्ये यशस्विनी॥२८॥ त्रिनेत्रा चक्षुषो रक्षे यमघंटा च नासिके॥ शंखिनी चक्षुवोर्म-
ध्ये श्रोत्रयोर्द्वारवासिनी॥२९॥ कपोलौ कालिका रक्षेत्कर्णमूले तु शांकरी॥ नासिकायां सुगंधा-
च उत्तरोष्ठे तु चर्चिका॥३०॥ अधरे चामृतकला जिह्वायां च सरस्वती॥ दन्तान् रक्षतु कौमारी कण्ठ

॥ दे॰ ॥
॥ ९ ॥

देशेनुचण्डिका ॥ २९ ॥ घंटिकां चित्रघंटा च महामायां तालुकम् ॥ कामाक्षा चिवुकं रक्षेद्वाचं मे
सर्वमंगला ॥ ३० ॥ ग्रीवायां भद्रकाली च पृष्टवंशे धनुर्धरी ॥ नीलग्रीवा बहिः कण्ठे नलिकां न
लकूवरी ॥ ३१ ॥ खड्गधारिण्युभौ स्कन्धौ बाहू मे वज्रधारिणी ॥ हस्तयोर्दण्डिनी रक्षेदम्बिका
चांगुलीषु च ॥ ३२ ॥ नखांछूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी ॥ स्तनौ रक्षेन्महादेवी मनःशोक
विनाशिनी ॥ ३३ ॥ हृदयं ललितादेवी उदरं सिंहवाहिनी ॥ नाभिं च योगिनी रक्षेद्गुह्यं गुह्येश्व
रीतथा ॥ ३४ ॥ भूतनाथा च मे मेढ्रं ऊरू मेघवाहिनी ॥ कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासि
नी ॥ ३५ ॥ जंघे महाबला रक्षेज्जानुमध्ये विनायकी ॥ गुल्फयोर्नारसिंही च पादपृष्ठे मितौजसी

॥ सप्त ॥
॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥३९॥ पादांगुलीः श्रीधरी च पादौ धन्वल्लवासिनी॥ दंष्ट्रां कपालिनी रक्षेत्केशांश्चैवोर्ध्वकेशिनी॥
रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा॥ रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती॥ ४०॥ अं
त्राणि कालरात्री च पित्तं च मुकुटेश्वरी॥ पद्मावती पद्मकोशे कफे चूडामणी तथा॥ ४१॥ ज्वाला
मुखी नखान्ज्वालमभेद्या सर्वसंधिषु॥ शुक्रं ब्रह्माणी च मे रक्षेच्छायां छत्रेश्वरी तथा॥ ४२॥ अहंकारं
मनो बुद्धिं रक्षेन्मे धर्मधारिणी॥ प्राणापानौ तथा व्यानमुदानं तु समानकम्॥ ४३॥ नागं कूर्मं च
कृकलं देवदत्तं धनंजयं॥ वज्रहस्ता तु मे रक्षेत्प्राणाकल्पं च शोभनम्॥ ४४॥ रसे रूपं च गंधं च शब्दं स्प
र्शं च शोभनम्॥ सत्वं रजस्तमश्चैव रक्षेन्नारायणी तथा॥ ४५॥ आयुर्मे रक्ष वाराहि धर्मं रक्षतु वै

CC-0. In Public Domain. Digitization by eGangotri

ल्मवी ॥ चित्तं रक्षतु इंद्राणी यशः कीर्त्तिं बलं च मे ॥ ४६ ॥ धृतिं स्मृतिं च लक्ष्मी च सदा रक्षन्तु मातरः
गोत्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ॥ ४७ ॥ पुत्रान् रक्षेन्महाकाली भार्यां रक्षतु भैरवी ॥ ध-
नेश्वरी धनं रक्षेत्कौमारी कन्यकास्तथा ॥ ४८ ॥ पंथानं सुपथा रक्षेन्मार्गं क्षेमंकरी तथा ॥ राज-
द्वारे महालक्ष्मी विजया सर्वतः स्थिता ॥ ४९ ॥ सर्वरक्षाकरं पुण्यं कवचं सर्वदा पठेत् ॥ इदं रह-
स्यं विप्रर्षे भक्त्या तव मयोदितम् ॥ ५० ॥ रक्षाहीनन्तु यत्स्थानं वर्जितं कवचेन च ॥ तत्सर्वं रक्ष मे दे-
वि विजये पापनाशिनि ॥ ५१ ॥ रक्ष मे सर्वगात्राणि दुर्गे दुर्गतिहारिणि ॥ पदमेकं न गच्छेत्तु यदीच्छे-
च्छुभमात्मनः ॥ ५२ ॥ तस्मात्सर्वप्रयत्नेन कवची भव सर्वदा ॥ कवचेनावृतो नित्यं यत्र यत्रैव गच्छति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥५३॥ तत्रतत्रार्थलाभश्चविजयःसर्वकामिकः॥ यंयंचिंतयतेकामंतंतंप्राप्नोतिलीलया॥५४॥ परमैश्व
र्यमतुलंप्राप्नोत्यविकलःपुमान्॥ निर्भयोजायतेमर्त्यःसंग्रामेष्वपराजितः॥५५॥ त्रैलोक्येसभवेत्पूज्यः
कवचेनावृतःपुमान्॥ इदंतुदेव्याःकवचंदेवानामपिदुर्लभम्॥५६॥ पइदंकवचंकृत्वासंग्रामेप्रविशेन्नरः
॥ जित्वाचसरिपून्सर्वान्कन्याणीगृहमाप्नुयात्॥५७॥ योनरःपठतेनित्यंत्रिसंध्यंश्रद्धयान्वितः॥ देवीक
लाभवेत्तस्यत्रैलोक्येचापराजितः॥५८॥ जीवेद्वर्षशतंसायमल्पमृत्युविवर्जितः॥ नश्यंतिव्याधयःसर्वेलू
ताविस्फोटकादयः॥५९॥ स्थावरंजंगमंवापिकृत्रिमंचापियद्विषम्॥ अभिचाराणिसर्वेचमन्त्रयन्त्राश्च
भूतले॥६०॥ भूचराःखेचराश्चैवकुलजाश्चोपदेशिकाः॥ सहजाकुलजामालाडाकिनीशाकिनीतथा

॥ चं ॥
॥ ११ ॥

॥ ६१ ॥ अन्तरिक्षचरा घोरा यक्षिण्यश्च महाबलाः ॥ ग्रहभूतपिशाचाश्च यक्षगंधर्वराक्षसाः ॥ ६२ ॥ ब्रह्म
राक्षसवेतालाः कूष्माण्डभैरवादयः ॥ नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ ६३ ॥ मानोन्नतिर्भ
वेद्राज्ञस्तेजोवृद्धिः पराभवेत् ॥ यशसा वर्द्धते सोपि कीर्त्तिर्भूमण्डले परा ॥ ६४ ॥ तस्माज्जपेत् सदा भक्त्या
कवचं कामदं मुने ॥ जपेत् सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥ ६५ ॥ निर्विघ्नेन भवेत् सिद्धिश्चण्डीजपस
मुद्भवा ॥ यावद्भूमण्डलं धत्ते सशैलवनकाननम् ॥ ६६ ॥ तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रकी ॥ दे
हान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ ६७ ॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥ लभन्ते परमं
रूपं शिवेन सह मोदते ॥ ६८ ॥ नित्यं यः स्मरते तस्य रोगा नश्यन्ति दूरतः ॥ ६९ ॥ इत्यां वाराहपुराणे हरिहर

दे० ॥ रामः ॥
॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मा विरचितं देव्याः कवचं संपूर्णम् ॥ ॥ अर्गलं दुरितं हंति कीलकं स्फ्रंदन्नया ॥ कवचं रक्षये न्नित्यं
वाम् राज्ञा नितयं वदेत् ॥ १ ॥ अर्गलं कीलकं चादौ पठित्वा कवचम्पठेत ॥ जपेत्सप्तशतीम्चण्डीं क्र
मस्रेष्ट्रः शिवोदितः ॥ २ ॥ अर्गलं हृदयेयस्य तथानर्गल वाग्भवो ॥ भविष्यंतीति निश्चित्य शिवेन रचि
तं पुरा ॥ ३ ॥ कीलकं हृदये यस्य कीलितं तु मनोरथैः ॥ भविष्यति न संदेहो नान्यथा शिवभाषितं
म् ॥ ४ ॥ कवचं हृदये यस्य सवज्रकवचः खलु ॥ ब्रह्मणा निर्मितः पूर्वमिति निश्चित्य चेतसा ॥ ५ ॥ ॐ
अस्यश्री अर्गलास्तोत्रमंत्रस्य महाविष्णुर्ऋषिः अनुष्टुप्छन्दः महालक्ष्मीर्देवता श्रीं बीजं ह्रीं शक्ति
ऐं कीलकं महालक्ष्मीप्रीत्यर्थे जपे विनियोगः ॥ ॥ अथ ध्यानम् ॥ प्रातर्यस्या कुमारी कुमुदकलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुयाजपमालाजयंतिमध्याह्नेप्रौढरूपाविकसितवदनाचारुनेत्राविशाला॥संध्यायांप्रौढ
रूपागलितकुचयुगारुण्डमालालुलंतीसादेवीदेवदेवीत्रिभुवनजननीचंडिकापातुनित्यं
॥१॥ऋषिरुवाच॥याकापिविविधाख्यातासमप्रधासेवकीर्तिता॥तस्याभेदाय्यनंताश्चतन्म
हात्म्यंशृणुभवद॥१॥यादेवीस्तूयतेनित्यंविबुधैर्वेदपारगैः॥सामेभवतुजिह्वाग्रेब्रह्मरूपासरस्व
ती॥२॥ॐजयंतीमंगलाकालीभद्रकालीकपालिनी॥दुर्गाक्षमाशिवाधात्रीस्वाहास्वधान-
मोस्तुते॥३॥जयत्वंदेविचामुंडेजयभूतापहारिणि॥जयसर्वगतेदेविकालरात्रिनमोस्तुते-
॥४॥मधुकैटभविद्राविविधातृवरदेनमः॥रूपंदेहिजयंदेहियशोदेहिद्विषोजहि॥५॥म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥
॥ १९ ॥

पिमहामते ॥ ३२ यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु ॥ ॥ तेषां कृते मे निश्वासो दौर्मनस्यं
च जायते ॥ करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥ ३३ ॥ मार्कंडेय उवाच ॥ ३४
ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ समाधिर्नाम वैश्योसौ स च पार्थिवसत्तमः
॥ ॥ कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदं ॥ उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्य
पार्थिवौ ॥ ३६ ॥ राजोवाच ॥ ३७ भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ ३८
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥ ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्वपि ॥ ३९
जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥ अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥

॥ रामः ॥
॥ १९ ॥

CC-0. In Public Domain. Digitization by eGangotri

श्वमौ

लोभादसाधुभिः॥[redacted]॥ विहीनः स्वजनैर्दारैः पुत्रैरादाय मे धनं॥२२॥ वनमभ्यागतो दुःखी निर
स्तश्चाप्तबंधुभिः॥[redacted]॥ सोहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकां॥२३॥ प्रवृत्तिं स्वजनानां च जं२
दाराणां चात्र संस्थितः॥[redacted]॥ किन्नु तेषां गृहे क्षेममक्षेमं किन्नु सांप्रतं॥२४॥ कथं ते किन्नु सद्वृ
त्ता दुर्वृत्ताः किन्नु मे सुताः॥[redacted]॥ राजोवाच॥[redacted]॥ यैर्निरस्तो भवांल्लुब्धैः पुत्रदारादिभिर्धनैः
तेषु किं भवतः स्नेहमनुबध्नाति मानसं॥२७॥ वैश्य उवाच॥२८॥ एवमेतद्यथा प्राह भवा
नस्मद्गतं वचः॥ किं करोमि न बध्नाति मम निष्ठुरतां मनः॥[redacted]॥ यैः संत्यज्य पितृस्नेहं धनलुब्धै 13
र्निराकृतः॥ पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः॥[redacted]॥ किमेतन्नाभिजानामि जानन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥चं॥
॥१८॥

जानेसप्रधानोमेशूरहस्तीसदामदः ॥१३॥ ममवैरिवशंयातःकान्भोगानुपलप्स्यते ॥ येम
मानुगतानित्यंप्रसादधनभोजनैः ॥१४॥ अनुवृत्तिंध्रुवंतेद्यकुर्वंत्यन्यमहीभृतां ॥ अस
म्यग्व्ययशीलैस्तैःकुर्वद्भिःसततंव्ययम् ॥१५॥ संचितःसोतिदुःखेनक्षयंकोशोगमिष्य
ति ॥ एतच्चान्यच्चसततंचिंतयामासपार्थिवः ॥१६॥ तत्रविप्राश्रमाभ्यासेवैश्यमेकंददर्शसः
सपृष्टस्तेनकस्त्वंभोहेतुश्चागमनेत्रकः ॥१७॥ सशोकइवकस्मात्त्वंदुर्मनाइवलक्ष्यसे
इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितं ॥१८॥ प्रत्युवाचसतंवैश्यःप्रश्रयावनतोनृपं ॥
॥१९॥ वैश्यउवाच ॥२०॥ समाधिर्नामवैश्योहमुत्पन्नोधनिनांकुले ॥ पुत्रदारैर्निरस्तश्चधन

॥रामः॥
॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सैतैर्युद्धे कोलाविध्वंसिभिर्जितः॥६॥ ततः स्वपुरमायातो निजदेशाधिपोभवत्॥ आक्रांतः सम-
हाभागस्तैस्तदा प्रबलारिभिः॥७॥ अमात्यैर्वलिभिर्दुष्टैर्दुर्वलस्य दुरात्मभिः॥ कोशोवलं चा-
पहृतं तत्रापि स्वपुरे ततः॥८॥ ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः॥ एकाकी हय-
मारुह्य जगाम गहनं वनं॥९॥ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः॥ प्रशांतश्वाप-
दाकीर्णं मुनिशिष्योपशोभितं॥१०॥ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः
इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे॥११॥ सोचिंतयत्तदा तत्र ममत्वाकृष्टचेतनः॥ म-
त्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत्॥१२॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा॥ न

.14

॥ वे· ॥
॥ ७ ॥

कालिकाम्·॥ महाकालीमहालक्ष्मी·महासरस्वती· ध्यात्वामानसोपचारैः संपूजयेत्
ॐ म्·॥ वीजनयायवि·द्महेतन्त्रधानाय धीमहि तन्नेशक्तिः प्रचोदयात् ॥ इतिगायत्री·
श्री ॐ नमश्चण्डिकायै ॥ ॐ मार्कण्डेयउवाच ॥ १ ॥ सावर्णिःसूर्यतनयोयोमनुःकथ्यते
ष्टमः॥ निशामयतदुत्पत्तिंविस्तराद्गदतोमम॥ २ ॥ महामायानुभावेनयथामन्वंतराधिपः॥
सबभूवमहाभागःसावर्णिस्तनयोरवेः॥ ३ ॥ स्वारोचिषेंतरेपूर्वंचैत्रवंशसमुद्भवः॥ सुरथो
नामराजाभूत्समस्तेक्षितिमंडले·॥ ४ ॥ तस्यपालयतःसम्यक्प्रजाःपुत्रानिवौरसान्·
बभूवुःशत्रवोभूपाःकोलाविध्वंसिनस्तदा॥ ५ ॥ तस्यतैरभवद्युद्धमतिप्रबलदंडिनः॥ न्यूनैरपि

॥ राम ॥
॥ ७ ॥

मंत्रजपेविनियोगः॥ प्रथमचरित्रस्यब्रह्माऋषिः गायत्रिछन्दो महाकालिप्रीत्यर्थेजपेप्र
थमचरित्रपाठेविनियोगः॥गायत्रीछन्दो महाकालिदेवतानन्दाशक्तिः॥ॐ रक्तदंतिका
विजं॥अग्नितत्त्वं॥ऋग्वेदमूर्त्तिः॥कल्हध्यानं॥महाकालिप्रीत्यर्थेप्रथमचरित्रपाठेवि
नियोगः॥ब्रह्मणेऋषयेनमः शिरसि॥गायत्रीछन्दसेनमोमुखे॥महाकालीदेवता
यैनमोहृदि॥वाग्वीजायनमोगुह्ये॥पावकःस्तत्तायनमःस्तनयो॥ ततोध्यानम्॥ॐ ख
ड्गंचक्रगदेषुचापपरिघाञ्छूलंभुशुंडींशिरःशंखंसंदधतींकरैस्त्रिनयनांसर्वाङ्गभूषावृता
म्॥यामस्तौत्स्वपितेहरौकमलजोहंतुंमधुंकैटभंनीलाश्मद्युतिमास्यपाददशकांसेवेमह

वैश्यासशोक्तमाश्चौकृतसावर्णिमन्वन्तरियुसावर्णि... सूर्यतनयइत्यादि· सावर्णिर्भविता·
मनुरित्येतत्पर्यन्तं सर्वं भगवतीमाहात्म्यप्रकाशस्य महत्स्तोत्रमहं कुर्वे॥ सार्थस्मृतिस्मारपस्त
स्तारं चरितत्रयं सरहस्यं पठित्वा पुनः षडंगन्यासपूर्वकं मंत्रराजमष्टोत्तरशतं संजप्य॥ ॥ॐ
का४ नमश्चण्डिकायै॥ ॐ अस्यश्रीसप्तशतिकास्तोत्रमालामंत्रस्य मार्कंडेयऋषिः आद्यामहाका
लीमहालक्ष्मीमहासरस्वत्योदेवता अनुष्टुप्जगती गायत्र्यादिनानाविधानिच्छंदांसि ऐं
ह्रीं क्लीं बीजानि क्षमलवरयूं स्वाम्राजशक्तिः परमेशो वं लिङ्गं अग्निर्वायुसूर्यास्तत्वं महाका
लीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थे सर्वपापक्षयार्थे भुक्तिमुक्तिसिद्ध्यर्थे सप्तसतीस्तोत्र

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यांनमः ॥ ॐ महाविद्यायैनमः हृदयायनमः ॥ ॐ महामंत्रायैनमः शिरसेस्वाहा ॥ ॐ चण्डिसप्तश
त्यैनमः शिखायैवषट् ॥ ॐ मृतसंजीविन्यैनमः कवचायहुं ॥ ॐ महाचराद्यैनमः नेत्रत्रयायवौष
ट् ॥ ॐ चतुषष्टिपद्यैनमः अस्त्रायफट् ॥ अथमंत्र ॥ ॐ ह्रीं क्लीं श्रीं क्रौं क्लीं चण्डिकायैदेव्यैशा
पानुग्रहंकुरुकुरुस्वाहा ॥ मंत्रोयंपाठादौसप्तवारंपठनीयः ॥ ॐ श्रीं क्लीं ह्रीं सप्तशतीचण्डिका
उत्कीलनंकुरुकुरुस्वाहा ॥ एवविंशतिसंख्यायाअयंजप्तव्यः ॥ ततोऋष्यादिन्यासषडङ्गन्या
सपूर्वकं अष्टोत्तरशतसंख्यायामंत्रराजंसंजप्य चरित्रत्रयस्यऋष्यादीन् स्मरेत् ॥ श्रीगुरु
परमगुरुपरमेष्ठिगुरुचरणकमलेभ्योनमः ॥ श्रीकृष्णद्वैपायनाभिधान महर्षि 16

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥चं०॥
॥१५॥

लकस्तोत्रंसंपूर्णं॥ ॥श्रीः अथसप्तशतीपाठांगत्वेननामानि॥ ॥ॐ चरित्रत्रयजाप्यस्यच
ण्डिकायान्नृपोत्तमः॥ सरहस्यंचनामानिब्रह्मोक्तावदामिते॥१॥ महाविद्यामहामंत्राचं नि२
डीसप्तशतीतिच॥ मृतसंजीविनीनामचतुर्थंपरिकीर्त्तितम्॥२॥ पंचमंचमहाचण्डीच
तुःषष्टिपदीपरम्॥ एतानियोभिजानातिनामानिनृपसत्तम॥३॥ जपंविनाभवेत्तस्यच
ण्डिकावरदासदा॥ ॐ महाविद्यायैनमः अंगुष्ठाभ्यांनमः॥ ॐ महामंत्रायैनमः तर्जनीभ्यां
नमः॥ ॐ चण्डिसप्तशत्यैनमः मध्यमाभ्यांनमः॥ ॐ मृतसंजीविन्यैनमः अनामिकाभ्यांन
मः॥ ॐ महाचण्ड्यैनमः कनिष्ठिकाभ्यांनमः॥ ॐ चतुःषष्टिपद्यैनमः करतलकरपृष्ठा

नमः॥
॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वत्प्रसादेनतेनजाप्यमिदंमया॥१२॥शनैस्तुजाप्यमानेस्मिँस्तोत्रेसम्पत्तिरुच्चकैः॥भवत्येवसम
ग्रापितंतत्प्रारभ्यमेवतत्॥१३॥ऐश्वर्यंयत्प्रसादेनसौभाग्यारोग्यसम्पदः॥शत्रुहानिःपरोमोक्षः
स्तूयतेसानकिंजनैः॥१४॥पठित्वार्गलंदेवीस्तुतिंकृत्वाचवैस्तवीम्॥भगवत्याःस्तुतिंवै
वनित्यंस्त्वात्वातुपूजयेत्॥१५॥इदंस्तोत्रंपठित्वायोमहास्तोत्रंपठेन्नरः॥सरहस्यार्गलोपेतंस
सम्यक्फलमश्नुते॥१६॥अथतोयंमहादेवःकृत्वाकीलितकारणात्॥निःकीलंचसदाभ
क्त्यापठितव्यंसमाहितैः॥१७॥प्रथमंसम्पठेद्देव्याःस्त्वात्वाचैवशुभंभवेत्॥शुचिर्देव्याःमहा
भक्त्यायेनाभीष्टफलंलभेत्॥१८॥इतिमायोनरेस्त्वायंभुवेमार्कण्डेयोक्तम्भगवत्याःकी 12

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चं॰॥
॥ १५॥

वमिदंशुभम्॥ ५॥ स्तोत्रं दैवरिशकाया स्तुतंत्वयस्तंवकारस॥ समाप्नोतिसुपुरायेनतोय-
यावन्निर्यंत्रगाम्॥ ६॥ सोपदेशमवाप्नोतिसर्वमेवनसंशयः॥ कृष्णायांमाचतुर्दश्यामे-
कस्यांवासमाहितः॥ ७॥ दद्यातिप्रतिगृह्णातिनान्यथैषाप्रसिद्ध्यति॥ इत्थंरूपेणकीलेन-
महादेवेनकीलितं॥ ८॥ योनिःकीलांविधायैनांनित्यंजपतिसस्फुटम्॥ ससिद्धःसग-
णःसोपिगंधर्वोजायतेवने॥ ९॥ नचैवाप्यटतस्तस्यभयंक्वापिहजायते॥ नाल्पमृत्युवशंया- ल३
तिमृतोमोक्षमवाप्नुयात्॥ १०॥ ज्ञात्वाप्रारभ्यकुर्वीतनकुर्वाणोविनश्यति॥ ततोज्ञात्वैव
वसम्पन्नमिदंप्रारभ्यतेबुधैः॥ ११॥ सौभाग्यादिचयत्किंचिद्दृश्यतेललनाजने॥ तत्सर्वं-

॥ रामः॥
॥ १५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२८॥ इति आगमांतरे अर्गलास्तोत्रं संपूर्णाम्‌॥ ॥ॐ अस्य श्रीकीलकस्तोत्रमंत्रस्य ईश्व-
र ऋषिः अनुष्टुप्छंदः महासरस्वती देवता ह्रीं बीजं श्रीं शक्तिः ऐं कीलकं महासरस्वतीप्रीत्यर्थे जपे
विनियोगः॥ ॥मार्कंडेय उवाच॥ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे॥ श्रेयःप्राप्तिनिमि-
त्तायनमः सोमार्द्धधारिणे॥१॥ सर्वमेतद्विनायस्तु मंत्राणामभिकीलकम्‌॥ सोपि क्षेममवा-
प्नोति सततं जपतत्परः॥२॥ सिध्यंत्युच्चाटनादीनि वस्तूनि सकलान्यपि॥ एतेन स्तुवतां देवीं स्तो-
त्रहेन्न सिध्यति॥३॥ न मंत्रं नौषधं तस्य न किंचिदपि विद्यते॥ विना जप्येन सिध्येत सर्वमुच्चा-
टनादिकम्‌॥४॥ समग्राण्यपि सिध्यंति लोकशंकामिमां हरः॥ कृत्वा निमंत्रयामास सर्वमे-

48

Nepal Sanskrit University, Balmiki Campus, Kathmandu

॥ प चं. ॥
॥ १२ ॥

९

कुरु ॥ रूपं ॥१८॥ प्रचण्डदैत्यदर्प्पघ्ने चण्डिके प्रणताय मे ॥ रूपं ॥१९॥ कृष्णेन संस्तुते देवि शश्वद्भ
क्त्या सदाम्बिके ॥ रूपं ॥२०॥ चतुर्भुजे चतुर्वक्त्र संस्तुते परमेश्वरि ॥ रूपं ॥२१॥ हिमाचलसुतानाथ
संस्तुते परमेश्वरि ॥ रूपं ॥२२॥ इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ॥ रूपं ॥२३॥ देवि प्रचण्ड
दोर्दण्डदैत्यदर्पविनाशिनि ॥ रूपं ॥२४॥ देवि भक्तजनोद्दामदत्तानन्दोदयेम्बिके ॥ रूपं ॥२५॥ पु
त्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥ रूपं ॥२६॥ स्तोमि ध्यानपरो नित्यं वरदा शुभदा भव ॥
रूपं ॥२७॥ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं ॥ तारिणीं दुर्गसंसारसागरस्य कुलोद्भ
वाम् ॥२८॥ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥ स तु सप्तशतीसंख्यावरमाप्नोति मानवः

॥ रामः ॥
॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri

हिषासुरनिर्णाशि धूम्राक्षस्य च मर्दिनी ॥ रूपं ॥६॥ रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ॥ रू
पं ॥७॥ निशुंभमथने देवि शुम्भासुरविनाशिनि ॥ रूपं ॥८॥ वन्दितांघ्रियुगे देवि देवि सौभाग्य
दायिनी ॥ रूपं ॥९॥ अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ॥ रूपं ॥१०॥ नतेभ्यः सर्वदा भक्त्या च
ण्डिके दुरितापहे ॥ रूपं ॥११॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ॥ रूपं ॥१२॥ चण्डि
के सततं ये त्वामर्चयन्तीह भक्तितः ॥ रूपं ॥१३॥ देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ॥ रूपं ॥१४
विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥ रूपं ॥१५॥ विधेहि देवि कल्याणं विधेहि विपुलां श्रियं
॥ रूपं ॥१६॥ सुरासुरशिरोरत्ननिघृष्टचरणांबुजे ॥ रूपं ॥१७॥ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं

१९

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

॥४२॥स्वजनेनचसंसक्तस्तेषुहार्दीतथाप्यति॥एवमेषतथाहंचद्वावप्यत्यंतदुःखितौ॥४३॥
दृष्टदोषेपिविषयेममत्वाकृष्टमानसौ॥तत्किमेतन्महाभागयन्मोहोज्ञानिनोरपि॥४४॥
७२ ममास्यचभवत्येषाविवेकान्धस्यमूढता॥४५॥ऋषिरुवाच॥४६॥ज्ञानमस्तिसमस्तस्यजंतो
र्विषयगोचरे॥४७॥विषयश्चमहाभागयातिचैवंपृथक्पृथक्॥दिवांधाःप्राणिनःके
चिद्रात्रावंधास्तथापरे॥४८॥केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः॥ज्ञानिनोमनुजा-
स्सत्यंकिंनुतेनहिकेवलं॥४९॥यतोहिज्ञानिनःसर्वेपशुपक्षिमृगादयः॥ज्ञानंचतन्मनुष्या
णांयत्तेषांमृगपक्षिणां॥५०॥मनुष्याणांचयत्तेषांतुल्यमन्यत्तथोभयोः॥ज्ञानेपिसतिप-

CC-0. In Public Domain. Digitization by eGangotri

श्यैतान्पतगाञ्छावचंचुषु॥५१॥कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा॥मानुषाम-
नुजव्याघ्रसाभिलाषाः सुतान्प्रति॥५२॥लोभात्प्रत्युपकाराय नन्वेते किं न पश्यसि॥तथा
पि ममतावर्त्ते मोहगर्त्ते निपातिताः॥५३॥महामायाप्रभावेण संसारस्थितिकारिणा॥
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः॥५४॥महामाया हरेश्चैतत्तया संमोह्यते जगत्-
ज्ञानिनामपि चेतांसि देवी भगवती हि सा॥५५॥बलादाकृष्य मोहाय महामाया प्रयच्छति
तया विसृज्यते विश्वं जगदेतच्चराचरं॥५६॥सैषा प्रसन्ना वरदा नृणां भवति मुक्तये॥सा
विद्या परमा मुक्तेर्हेतुभूता सनातनी॥५७॥संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी॥५८॥राजोवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च ॥ ५९ ॥ भगवन्का हि सा देवी महामायेति यां भवान् ॥ ६० ॥ ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च
किं द्विज ॥ यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ६१ ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां
वर ॥ ६२ ॥ ऋषिरुवाच ॥ ६३ ॥ नित्यैव सा जगन्मूर्त्तिस्तया सर्वमिदं ततं ॥ ६४ ॥ तथापि तत्स
मुत्पत्तिर्बहुधा श्रूयतां मम ॥ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ ६५ ॥ उत्पन्नेति तदा
लोके सा नित्याप्यभिधीयते ॥ योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ ६६ ॥ आस्तीर्य शे
षमभजत्कल्पांते भगवान्प्रभुः ॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ ६७ ॥ विष्णुकर्णम
लोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ॥ स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापति ॥ ६८ ॥ दृष्ट्वा तावसु-

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ २१ ॥

रोवोयोप्रसुप्तंचजनार्द्दनम् ॥ तुष्टावयोगनिद्रांतामेकाग्रहृदयस्थितः ॥ ६९ ॥ विबोधनार्थायह
रेर्हरिनेत्रकृतालयां ॥ विश्वेश्वरींजगद्धात्रींस्थितिसंहारकारिणीं ॥ ७० ॥ निद्रांभगवतींवि
ष्णोरतुलांतेजसःप्रभुः ॥ ७१ ॥ ब्रह्मोवाच ॥ ७२ ॥ त्वंस्वाहात्वंस्वधात्वंहिवषट्कारःस्वरात्मिका
॥ ७३ ॥ सुधात्वमक्षरेनित्ये त्रिधामात्रात्मिकास्थिता ॥ अर्द्धमात्रास्थितानित्यायानुच्चार्या
विशेषतः ॥ ७४ ॥ त्वमेवसात्वंसावित्रीत्वंदेविजननीपरा ॥ त्वयैतद्धार्यतेसर्वंत्वयैतत्सृज्यतेज
गत ॥ ७५ ॥ त्वयैतत्पाल्यतेदेविस्वमत्स्यन्तेचसर्वदा ॥ विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपाल
ने ॥ ७६ ॥ तथासंहृतिरूपांतेजगतोस्यजगन्मये ॥ महाविद्यामहामायामहामेधामहास्मृतिः

21

॥ रात्म्यः ॥
॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥७७॥महामोहा च भवती महादेवी महासुरी॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी॥७८॥का
लरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा॥७९॥ल
ज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा॥८०
शंखिनी चापिनी बाणभुशुंडीपरिघायुधा॥ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी॥८१
परापराणां परमा त्वमेव परमेश्वरी॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके॥८२॥तस्य स-
र्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा॥ यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जगत्॥८३॥सो-
पि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः॥ विष्णुः शरीरग्रहणमहमीशान एव च॥८४॥कारिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तेयतोतस्त्वांकःस्तोतुंशक्तिमान्भवेत॥सात्वमित्थंप्रभावैःस्वैरुदारैर्देविसंस्तुता॥८५॥मोहयै
तौदुराधर्षावसुरौमधुकैटभौ॥प्रबोधंचजगत्स्वामीनीयतामच्युतोलघुः॥८६॥बोधश्चक्रिय
तामस्यहंतुमेतौमहासुरौ॥८७॥ऋषिरुवाच॥८८॥एवंस्तुतातदादेवीतामसीतत्रवेधसा॥
॥८९॥विष्णोःप्रबोधनार्थायनिहंतुंमधुकैटभौ॥नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः॥
॥९०॥निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः॥उत्तस्थौचजगन्नाथस्तयामुक्तोजनार्दनः
॥९१॥एकार्णवेहिशयनात्ततःसददृशेचतौ॥मधुकैटभौदुरात्मानावतिवीर्यपराक्रमौ॥९२
क्रोधरक्तेक्षणावत्तुंब्रह्माणंजनितोद्यमौ॥समुत्थायततस्ताभ्यांयुयुधेभगवान्हरिः॥९३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचवर्षसहस्राणि बाहुप्रहरणो विभुः ॥ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥ ९४ ॥ उक्त
वंतौ वरोऽस्मत्तो व्रियतामिति केशवं ॥ ९५ ॥ भगवानुवाच ॥ ९६ ॥ भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ५२
॥ ९७ ॥ किमन्येन वरेणात्र एतावद्धि वृतं मम ॥ ९८ ॥ ऋषिरुवाच ॥ ९९ ॥ वंचिताभ्यामिति तदा सर्व
मापोमयं जगत ॥ १०० ॥ विलोक्य ताभ्यां गदितो भगवान्कमलेक्षणः ॥ आवां जहि न यत्रोर्वी स॰
ले लिंन परिप्लुता ॥ १०१ ॥ ऋषिरुवाच ॥ १०२ ॥ तथेत्युक्त्वा भगवता शंखचक्रगदाभृता ॥ कृत्वा च
क्रेण वै छिन्ने जघने शिरसी तयोः ॥ १०३ ॥ एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं ॥ प्रभा
वमस्या देव्यास्तु भूयः शृणु वदामि ते ॥ १०४ ॥ इति मार्कंडेयपुराणे सावर्णिमन्वन्तरे देवीमाहा- के॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥
॥२२॥

न्मेमधुकैटभवधः ॥१॥ उ ॥१४॥ अ ॥२८॥ श्लो ॥ ६६ ॥ ॥ ॐ नमश्चण्डिकायै ॥ अथ रात्रिसूक्तम्ः
ह्रि ॥ ॐ ॥ रात्रीव्य‍ख्यदायतीपुरुत्रादेव्य ॥१॥ क्षभिः विश्वा अधिश्रियोधित ओर्वप्रा अमर्त्या
निवतोदेव्यु ॥१॥ द्वतः ज्योतिषाबाधतेतमः निरुस्वसारमस्कृतोषसंदेव्यायती ॥ अपेदुहासते
तमः ॥ सानोअद्ययस्यावयन्नितेयामन्न ॥ विक्ष्महिवृक्षेनवसतिंवयः नियामासोअविक्षत
निपद्वन्तोनिपक्षिणः निश्येनासश्चिदर्थिनः यावयावृकंवृकम् ॥१॥ यवयस्तेनमूर्म्ये ॥ अथा
नःसुतराभव ॥ उपमापेपिशत्तमः कृष्णंव्यक्तमस्थित ॥ उषऋणेवयातय उपतेगाइवाकरंवृ
णीष्वदुहितर्दिवः ॥ रात्रीः स्तोमन्नजिग्युषे ॥१॥ आरात्रिपार्थिवंरजः पितुरप्रायिधामभिःदिवः

॥ राम ॥
॥२२॥

23

स्तदांसि ह हस्ती वितिष्ठस आ तेषम्वर्तन्ते तेतम ॥ येते रात्री नृचक्षसो युक्तासो नवतिर्नव अशीतिः स्

न्त्वष्टा उतो ते सप्त सप्तती ॥ रात्रीं प्रपद्ये जननीं सर्वभूतनिवेशनीम् ॥ भद्रां भगवतीं कृष्णां विश्व

स्य जगतो निशां ॥ संवेशनीं संयमनीं ग्रहनक्षत्रमालिनीम् ॥ प्रपन्नोहं शिवां रात्रीं भद्रे पारमशीम

हि ॥ भद्रे पारमसीमहो नमः ॥ स्तोष्यामि प्रयतो देवीं शरण्यां बह्वृचप्रियाम् ॥ सहस्रसम्मितां दु

र्गां जातवेदसे सुनवाम सोमं शान्त्यर्थं तद्द्विजातीनामृषिभिः सोमपाश्रिताः ॥ ऋग्वेदे त्वं समु

त्पन्ना रातियतो निरहाति वेदः ॥ ये त्वां देवि प्रपद्यन्ति ब्राह्मणा हव्यवाहिनीं ॥ अविद्या बहुविद्या वा

स नः पर्षदति दुर्गाणि विश्वा ये अग्निवर्णां शुभां सौम्यां कीर्तयिष्यन्ति ये द्विजाः तान्तारयति दुर्गा॰

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ २५ ॥

गिनावेवसिन्धुदुरितात्यग्निः॥ दुर्गेषुविषमेघोरेसंग्रामेरिपुसङ्कटे॥ अग्निचोरनिपातेषुदुष्टग्र
हनिवारणे॥ दुर्गेषुविषमेषुत्वं संग्रामेषुवनेषुच॥ मोहयित्वाप्रपद्यन्तेतेषाम्मेअभयङ्कुरु॥
तेषाम्मेअभयंकुर्वोन्नमः केशिनींसर्वभूतानांपञ्चमीतिचनामचसामांसमादिशादेवीसर्व
नी ४ तःपरिरक्षतुसर्वतःपरिरक्षोंन्नमः॥ तामग्निवर्णान्तपसाज्वलन्तीम्वैरोचनींकर्मफलेषुजुष्टा नी ४
म॥ दुर्गान्देवींशरणामहम्प्रपद्येसुतरसितरसेनमः॥२॥ दुर्गादुर्गेषुस्थानेषुशन्नोदेवीरभीष्ट 25
ये॥ यइमन्दुर्गास्तवम्पुण्यंरात्रौरात्रौसदापठेत्॥ रात्रिकुशिकःसौभवोरात्रिःस्तवोगायत्री
रात्रिसूक्तञ्जपेन्नित्यन्तत्कालउपपद्यते॥ इतिवेदोक्तरात्रिसूक्तंसमाप्तम्॥ अथरुद्र ॥ राम ॥

॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामलतन्त्रोक्तम्॥ श्री ॐ नमश्चण्डिकायै नम॥ राजोवाच॥ मुने कथय सर्वज्ञ भूयः किञ्चित्सनुत्त
मम्॥ तत्त्वमेतस्य सर्वस्य येन सिद्धिरवाप्यते॥१॥ ऋषिरुवाच॥ भूयः शृणु महाभाग देवीमाहात्म्य
मुत्तमम्॥ विनायेन स्तवश्चाप निर्जीवो नृपनंदन॥ २॥ दृष्ट्वा सुभम्भिनिहतन्दारुणान्देवकारक
म्॥ आजग्मुः परमानन्दं ब्रह्मविष्णुमहेश्वराः॥३॥ देवास्तुतिसमाधाय गतानांलक्ष्यसंयुताः॥
आज्ञामादाय देवेन्द्रपां कर्तुन्दर्शनमुद्यताः॥४॥ बद्धांजलिपुटाः साक्षात्तुष्टुवुः क्रमशः शिवाम्
लोकानाञ्च हितार्थाय देवीसूक्तानि पार्थिव॥५॥ ब्रह्मा सरस्वतीसूक्तं लक्ष्मीसूक्तं जनार्दनः
सूक्तन्तथा महाकाल्याः शङ्करः स्वयमब्रवीत्॥६॥ ब्रह्मोवाच॥ आज्ञाम्पुराणीममरां सनातनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ सं
॥ २५

च्चतुर्भुजामुस्तकमलधारिणीम्॥ वराभयाभ्यामनुशोभिहस्तां नमामि तां जाड्यजयविनाशिनीम्
॥२॥ सरस्वतीं त्वामनुनौमि वाचम्बाचः प्रदां हंसवराधिरूढाम्॥ सकामणिद्योतितकण्ठहारा
म्भजे पिके लभ्यास्मरमाम्नविज्ञाम्॥३॥ श्रीकण्ठशक्तिञ्च यशोभमानान्द्धारतः पर्यैशाकृतानुरू
पाम्॥ पञ्चीरवासान्धृतभूरुहाशां सरस्वतीं त्वाम्प्रणमामि देवीम्॥४॥ कलाध्ययन्त्वामघ
कोटिनाशाम्बिहारयं ज्ञाम्बिमलेकशोभाम्॥ स्वच्छावदातां स्फटिकानुरूपां सरस्वतीन्त्वा
म्प्रणमामि मातः॥१०॥ वाक्काम्यकामैः परमैः पवित्रैः रमारमाह्रीवरदानदक्षैः॥ बीजैरमी
भिः कपिबीजयुक्तैरयुग्मामिश्रैरिति मंत्रराजः॥११॥ एकेन चैकेन च युग्मकेन द्याभ्यामथैकेन

॥राम॥
॥२५॥

25

तथैव चैवैथैः॥ करांगस्त्रीभिः परमोन्नमोयं निहंति पापानि च साधकानाम्॥ १२॥ हठेनैव संरखलया
वस्त्रयाविधानं पत्न्या चतथैववाचा॥ श्रीःकंवपत्न्या परिशोभया च न्यासैरमीभिः पतितोपि श्रा
मुः॥ १३॥ इत्येवंगाहोमानस्त कलार्थसिद्धिः सुकिंपुकैर्वागापि सिद्धिस्तुहेतु॥ समहस्तपत्रेशारमानि
वासः सुपायसेनापि च वेदसिद्धिः॥ १४॥ नवाम्बतेमहिमानम्विद्वामः सरस्वती प्रार्थिते लोक
मध्ये॥ जानंन्ति किं तु तुद्धाभूमितोयेजडाश्चयम्बस्लहरीशामुख्या॥ १५॥ तवैववाचावचनम्व
ग२ दामो जिघ्रांसतयाचतवैवजीवाः पद्मपामहेत्वां हिमातर्महेशि स्पृशामसासास्त्वयि संयुताया
मः॥ १६॥ स्वादम्विदामस्तवशक्तियोगाङ्कृत्तीर्महे तवशास्त्यामहेशि॥ गच्छामहे तवशकेः प्रभा

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥२६॥

वासनस्त्वयुक्तात्त्वदस्मान्निवेशात् ॥ १७ ॥ आत्मा मनस्त्वञ्च त्वमेव देहं त्वमेव देहेन्द्रियपञ्चतत्त्वम् ॥
त्वमेव वेदविषयः शास्त्ररूपः परावरेशः परमात्वमेव ॥ १८ ॥ ॐ रविश्चते चन्द्रमाश्चते तारकाश्च-
ते भूश्चते आपश्चते तेजश्चते वायुश्चते व्योमश्चते शब्दश्चते स्पर्शश्चते रूपश्चते गन्धश्चते रसश्चते प्रा-
णश्चते अपानश्चते व्यानश्चते उदानश्चते समानश्चते नागश्चते कूर्मश्चते कृकलश्चते देवदत्तश्चते
धनंजयश्चते भूतात्मा चते आत्मा चते अनंतरात्मा चते परमात्मा चते ज्ञानात्मा चते विद्या चते स-
र्वात्मा चते मम चित्तं त्वय्येव विनिवेशनाम् ॥ १९ ॥ यदा न वाराङ्गभुवनानि जीवा नाहं न विष्णुर्न च
पार्वतीशः न वेश्वरो नापि महाशिवश्च त्वमेव चासि च्छशिवा भविष्यति ॥ २० ॥ कालस्त्वमेवासि जग-

॥ रामः ॥
॥२६॥

26

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नपाणां स्वभाववीर्याधिकान्त्वमेव त्वमेव [illegible] त्वम्परमात्मशक्तिर्नमामि ते पादपीठं सरस्वती ॥ २१
त्वमेव वाणीनि खिलाश्च वेदास्त्वंशब्दशक्तिस्तथार्थशक्तिः ॥ त्वमक्षराविद्यासि परावरेशी
त्वाञ्च स्वशक्तिंशरणाम्प्रपद्ये ॥ २२ ॥ स्तोत्रं त्विदंसुभगे देविनित्यमायंप्रातस्तथैवमध्याह्नकालेपठंति
ये श्रद्धयाप्रतिचितास्तेभोगमोक्षौ सहसालभन्ते ॥ २३ ॥ न वैक्लयोनिन्नदरिद्रतान्नव्याध्यात्माधि
तापञ्च संलभन्ते ॥ तएवधन्याश्चतएवपूज्याः सर्वत्रमानो भवतीहतेषाम् ॥ २४ ॥ परस्पुरा
णां स्थिरजंसुधामयं यत्तल्लभन्ते त्वजगत्त्रयाणाम् ॥ तेप्राप्नुवन्ति प्रकटप्रभावास्त्वां सर्वयोनिंशर
णाम्प्रपद्ये ॥ २५ ॥ ऋषिरुवाच ॥ स्तुत्वानयावेदवाँ सर्वसारस्वरूपया ॥ प्रसन्नादेवदेवेशीमहा ग्या १

चं ॥
२७ ॥

श्वेतसरस्वती ॥ २६ ॥ आविर्भूतामहादेवीप्रसन्नतोषैककारिणी ॥ उवाचवचनन्दिव्यंसर्वानन्द
प्रदायकम् ॥ २७ ॥ देव्युवाच ॥ स्तुतानयाचैतेनवत्स त्वस्मितोयसमन्विता ॥ प्रीतास्मित्रीपता
न्देववरंमत्तोयत्कारकम् ॥ २८ ॥ वलोवाच ॥ अंतर्धानेमहादेविहृष्टंभवतुसर्वदा ॥ एषएववर
मातानुज्ञमोवीयतेमया ॥ २९ ॥ त्वमन्तेचापिदेवेशितेजोऽस्मिन्निधीयताम् । येनकार्याणि
सिध्यन्तिसाधकानाम्महात्मनाम् ॥ ३० ॥ देव्युवाच ॥ सर्वदातेमनोदेवकुलधर्मेसुपूजिते ॥ ह
ठम्भवतुसन्नद्धत्त्वंमाहात्म्येपरंतप ॥ ३१ ॥ सर्वेसिद्धिप्रदञ्चास्तुपरमानन्ददायकम् । ॥ विना
सक्तंमन्त्रैध्यन्तुस्तोत्रंसप्तशतींमम ॥ ३२ ॥ मातृगामीसविज्ञेयोनरकावासतत्पर ॥ ममैवा

॥ सम: ॥
॥ २७ ॥

27

ज्ञापराधेनब्रह्मघ्नानाकृतिम्व्रजेत्॥ २३॥ ऋषिरुवाच॥ एवमुक्त्वावचोदेवीतत्क्षिमासिन्नृपे
नम॥ २४॥ ॥ इतिरुद्रयामलेघटतंत्रेब्रह्मकृतंसरस्वतीसूक्तंसम्पूर्णम्॥ श्रीअथमहासर
स्वतीस्तवम्मार्कण्डेयपुराणोक्तम्॥ श्रीॐनमश्चण्डिकायै॥ ब्रह्मोवाच॥ जन्तोरपश्चिमतनोः
सतिकर्मसाम्येनिःशेषपाशपटलच्छिदुरोनिमेषः॥ कल्याणदेशिककटाक्षसमाश्रयेणका
रुण्यतोभवसिशाम्भवदेशिकेष्टा॥ १॥ मुक्ताविभूषणवतीनवविद्रुमाभायच्चेतसिस्फुरसि
२८ तारकितेवसन्ध्या॥ एकःसएवभुवनत्रयसुन्दरीणांकन्दर्पताम्व्रजतिपञ्चशरैर्विनापि॥ २॥ येभा
वयन्तिमृतिहाहभिरंभुजालेराप्यायमानभुवनाममृतेश्वरीत्वम्॥ तेस्रापयन्तिमनुजान्तरलंघनी

CC-0. In Public Domain. Digitization by eGangotri

याम्ब्रस्यादिभिःसुरवरैरपिकालकर्ष्टम् ॥३॥ यःस्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यांव्या
ख्यासमुद्यतकरांशरदिंदुशुभ्राम् ॥ पद्मासनांचहृदयेभवतीमुपास्तेमातःसविश्वकवितार्किकच
क्रवर्ती ॥४॥ बर्हावतंसयुतबस्तुरकेशपाशांरोमावलीकृतघनस्तनहारशोभाम् ॥ श्यामांप्रवाल
वसनांसुकुमारहस्तांत्वामेवनौमिशवरींशवरस्यनाथाम् ॥५॥ अर्थेनकिंत्वबलताललिते
नमुग्धेकान्तंविभोःपरुषमर्द्धमिदंत्वयेति ॥ आलीजनस्यपरिहासवचांसिमन्येमन्दस्मितेनतत
वदेविजडीभवन्ति ॥६॥ ब्रह्माण्डबुद्बुदकदम्बकसङ्कुलोयम्मायोदधिर्विविधदुःखतरङ्गमा
तः ॥ आश्चर्यमम्बझटितिप्रलयंप्रयातित्वद्ध्यानसन्ततिमहावडवामुखाग्नौ ॥७॥ दाक्षायणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्तिकुटिलेतिगुह्याननेतिकात्यायनीतिकमलेतिकलावतीति ॥ एषासतीभगवतीपरमार्थिनापि
संदृश्यतेवहुविधानतुनर्तकीव ॥ ८ ॥ सद्भोवमिहधमियदागिरिजेतदानींवातार्कयोस्त्वमसिनु
नमनामरूपा ॥ यद्वाविकाशमुपयासियदातदानीन्त्वन्नामरूपगणनासुकृतीभवन्ति ॥ ९ ॥ भो
गायदेविभवतीह्यतिनःप्रणाम्यभक्तिकृशीकृतसरोजगृहाःसहस्त्राः ॥ चिन्तामणिप्रचयकल्पितस
द्वशैलेकल्पद्रुमोपवनएवचिरंचरन्ति ॥ १० ॥ हन्तुन्त्वमेवभवसित्वदधीनमीशोसंसारतापमखि
लंदययापशूनाम् ॥ वैकर्त्तनीकिरणसंहतिरेवदक्षाधर्मन्त्रिजन्ममथितुन्त्रिजयापिदक्षा ॥ ११ ॥
शक्तिःशरीरमधिदैवतमन्तरात्माज्ञानंक्रियाकरणमासनजालमिच्छा ॥ ऐश्वर्यमायतनमावर

॥ वं ॥
॥ २९ ॥

रागायचवलहिंल्लग्ज्ञमेघदपिदिविशशाङ्कमौले: ॥ १२ ॥ भूमौ निरुक्तिरुदितापयसि प्रतिष्ठा विद्यानलेरु
सिपाततडिन्नतेवभूयोपितन्विशशिनिकवमराउलेनुनिस्पन्दमानपरमामृततोयरूपा ॥ १३ ॥ आ
नन्दलक्षरामनाहतनाभिदेशेनाहात्मनापरिणतंतववरूपमीशे ॥ प्रत्यङ्मुखेनमनसापरिचीयमानं
सिन्धवंन्तिनेत्रसलिलै:पुलकैश्चधन्या: ॥ १४ ॥ त्वच्चन्द्रिकाशशिनितिग्मरुचौरुचिस्त्वंमन्वेतनासि
भा॰ पुरुषेपवनेव्रतम् ॥ त्वंस्यादुतासिसलिलेद्दितिवनिलमुष्यानि:सारमेतदखिलंत्वदृतेयदिस्यात् ॥
॥ १५ ॥ ज्योतिंषियेत्रविचरन्तियदन्तरिक्षेसन्तेपयांसिपदहिर्धरणीन्दधन्ते ॥ यद्वातिवायुरनलोयदु
दर्चियस्तेतत्सर्वमम्बतवकेवलमात्मेयेव ॥ १६ ॥ पावनस्मदम्पदसरोजयुगंत्वदीयन्नांगीकरोतिहृद्

॥ रामः ॥
॥ २९ ॥

येषु जगद्धररायम्॥ तावद्दिवर्गा जटिलाः कुटिलप्रकारास्तर्कैग्रहाः श्रमयि नाम्बलयीभवन्ति·
॥१७॥ यद्देवयानपितृयानविहारमेकं कृत्वा मनः कि? रशामघराऽत्र सार्वभौमम्॥ यानेव वेदतक
राररापञ्च्व कसपर्वाशिपार्वतिनयां त्रिनीयामकत्वम्॥१८॥ स्थूलासुमूर्त्तिषु महीप्रमुखा
सुमूर्त्तैः कस्याश्रयामितवैवैभवमम्ब यस्याः॥ कांत्वा गिरामपि न सकपतरुव्वक्रुंसापि स्तुतां
किलमयेति तितितिक्षितव्यम्॥१९॥ कालाग्निकोटिरुचिमम्ब षडध्वशुद्धमालां वनेषु भवतीम
रमर्द्धिवृद्धिम्॥ रूपामां घनस्तननतां सकलीकृतौ च ध्यायन्त एव भवतीं कुरवो वदन्ति॥२०॥ वि
घाम्बराह्वतिविरम्बरमम्ब केचिदानन्दमेव कतिचित्कति विच्चमायाम्॥ त्वामिश्वमाहुरपरे व

CC-0. In Public Domain. Digitization by eGangotri

॥पं०॥
॥३०॥

पमात्मनाममासारपारकरुणाङ्करुमूर्त्तिमेव॥२१॥कुवलयदलनीलम्बन्धुरस्निग्धकेशाम्पृथुतर
कुचभारंक्रान्तकान्तावलग्नम्॥किमिहबहुभिरुक्तैस्त्वत्स्वरूपम्परन्नः सकलभुवनमातःसन्ततं
सन्निधत्ताम्॥२२॥करुणायकोमलकटाक्षविराजमानेसंसारतारिणिशिवेसकलाघहन्त्रि॥
साक्षाद्विवन्दितपदाममराभिवन्द्याम्वागीश्वरीमहमनन्तगुणाम्प्रयामि॥२३॥कलातीताङ्कलामा
लांसारासारनिषेविताम्॥अमोघदाममोघाम्बजामिशारदांगिराम्॥२४॥धात्रीम्विधात्रीङ्क
ल्याणींधराधारणामुत्तमाम्॥अवियोनिमनाद्यान्त्वावाचान्त्वांसरणाम्ब्रजे॥२५॥अजाम्पुराणी
ममृतामद्वितीयांसनातनीम्॥वराम्वरेण्याम्वरदाम्वरश्रेष्ठाम्वरप्रियाम्॥२६॥सुवासांसत्त्वि

॥राम॥
॥३०॥

30

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हासनन्दरूपांत्वांशरणंव्रजे॥२६॥मार्कण्डेयउवाच॥इतिस्तुत्यवसानेमत्स्पशाद्भूर्भ्यरूपामयी॥
महामरस्वतीदेवीप्रोवाचवचनंशुभम्॥२८॥देव्युवाच॥वरम्वरयभद्रन्तेकमलोद्भवसुव्रत॥स्तु
त्यानयामनोदेवसन्तोषम्ममचागमत्॥२९॥ब्रह्मोवाच॥यदिदेविप्रसन्नासिवरदासिवरेश्वरि
स्वभक्तौदेहिमेहार्द्दंभवबन्धविमोचकम्॥३०॥देव्युवाच॥एवमस्तुमहाभागकमलोद्भवमारि
ष॥मत्प्रसादात्तवमहानिर्मलाबुद्धिरस्तुते॥३१॥महामरस्वतीसूक्तंयत्त्वयाभाषितंस्विधे॥तस्मि
न्नतःप्रसादोमेनित्यामयवचोमम॥३३॥निःफलस्तस्यपाठोस्तुममवाक्यनियंत्रणात्॥अनेन
पठितादेवीधर्मकामार्थमोक्षदा॥३४॥ऋषिरुवाच॥इत्युक्त्वान्तर्धिमापेदेमहापूर्वासरस्वती
२ महासरस्वतीसूक्तम्विनायस्त्वाशिरःकाम्पठेत॥ब्रह्मज्ञानाद्गतिंयातिशापमाप्नोतिदारुणम्॥३२॥२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥वं॥
॥३१॥

वरेशाछन्दपित्वाचलोकक ल्याणकारिणी॥३५॥ इतिमार्कण्डेयपुराणेसावर्णिकेमन्वन्त
रेदेवीमहात्म्येब्रह्मप्रोक्तंसरस्वतीसूक्तंसम्पूर्णम्॥ श्रीनमश्चण्डिकायै॥ अस्यश्रीसप्तश
तीस्तोत्रमन्त्रस्यमध्यमचरित्रस्यविष्णुर्ऋषिरुष्णिकछन्दोमहालक्ष्मीर्देवताशाकम्भरीशक्तिः
ह्रींदुर्गाबीजंवायुस्तत्त्वंयजुर्वेदस्मृतिःबालार्कनिभध्यानंलक्ष्मीप्रीत्यर्थेजपेविनियोगः॥
ध्यानम्॥ अक्षस्रक्परशुंगदेषुकुलिशंपद्मंधनुःकुण्डिकांदण्डंशक्तिमसिञ्चचर्मज
लजंघण्टांसुराभाजनम्॥शूलम्पाशसुदर्शनेचदधतींहस्तैःप्रवालप्रभांसेवेसैरिभमर्दिनी
मिहमहालक्ष्मींसरोजस्थिताम्॥२॥ऋषिरुवाच॥१॥देवासुरमभूद्युद्धम्पूर्णमब्दशतम्पु

॥रामः॥
॥३१॥

31

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा॥ महिषेसुराणामधिपेदेवानाञ्चपुरन्दरे॥१॥ तत्रासुरैर्म्महावीर्य्यैर्द्देवसैन्यम्पराजितम्॥ जि
त्वाचसकलान्देवानिन्द्रोभून्महिषासुरः॥२॥ ततःपराजितादेवाःपद्मयोनिम्प्रजापतिम्॥ पु
रस्कृत्यगतास्तत्र यत्रेशगरुडध्वजौ॥३॥ यथावृत्तन्तयोस्तद्वन्महिषासुरचेष्टितम्॥ त्रिदशा
ःकथयामासुर्द्देवाभिभवविस्तरम्॥४॥ सूर्य्येन्द्राग्न्यनिलेन्दूनांयमस्यवरुणस्यच॥ अन्येषा
ञ्चाधिकारान्सस्वयमेवाधितिष्ठति॥५॥ स्वर्गान्निराकृताःसर्व्वेतेनदेवगणाभुवि॥ विचर
न्तियथामर्त्यामहिषेणदुरात्मना॥६॥ एतद्वःकथितंसर्व्वममरारिविचेष्टितम्॥ शरणाञ्च
प्रपन्नाःस्मोवधस्तस्यविचिन्त्यताम्॥७॥ इत्थन्निशम्यदेवानांवचांसिमधुसूदनः॥ चकारको

CC-0. In Public Domain. Digitization by eGangotri

॥चं॥
॥३२॥

पंशम्भुश्चभ्रुकुटीकुटिलाननौ॥९॥ ततोतिकोपपूर्णस्य चक्रिणोवदनात्ततः॥ निश्चक्रा
ममहत्तेजो ब्रह्मणः शङ्करस्य च॥१०॥ अन्येषाञ्चैव देवानां शक्रादीनां शरीरतः॥ निर्ग
तं सुमहत्तेजस्तच्चैक्यं समगच्छत॥११॥ अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम्॥ ददृशु
स्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरं॥१२॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजम्॥ एकस्थ
न्तदभून्नारी व्याप्तलोकत्रयन्त्विषा॥१३॥ यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम्॥
याम्येन चाभवन्केशा बाहवो विष्णुतेजसा॥१४॥ सौम्येन स्तनयोर्युग्मं मध्यञ्चैन्द्रेण चाभ
वत्॥ वारुणेन च जंघोरू नितम्बस्तेजसा भुवः॥१५॥ ब्रह्मणस्तेजसा पादौ तदङ्गुल्योर्क

32

॥राम॥
॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेजसा ॥ वसूनाञ्चकराङ्गुल्यः कौवेरेन्नैव नासिका ॥ १६ ॥ तस्यास्तु दन्ताः सम्भूताः प्राजापत्ये
नतेजसा ॥ नयनत्रितयञ्जज्ञे तथा पावकतेजसा ॥ १७ ॥ भ्रुवौ च सन्ध्ययोस्तेजः श्रवणाव
निलस्य च ॥ अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ॥ १८ ॥ ततः समस्तदेवानान्तेजोरा
शिसमुद्भवाम् ॥ तां विलोक्य मुदम्प्रापुरमरा महिषार्दिताः ॥ १९ ॥ शूलं शूलाद्विनिष्कृ
ष्य ददौ तस्मै पिनाकधृक ॥ चक्रञ्च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः ॥ २० ॥ शंखञ्च वरु
णः शक्तिन्ददौ तस्मै हुताशनः ॥ मारुतो दत्तवांश्चापम्बाणपूर्णे तथेषुधी ॥ २१ ॥ व
ज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिप ॥ ददौ तस्मै सहस्राक्षो घण्टामैरावताद्गजात ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥चं॥
॥३३॥

कालदण्डाद्यमोदण्डंपाशञ्चाम्बुपतिर्ददौ॥प्रजापतिश्चाक्षमालांददौब्रह्माकमण्डलुम्॥२३॥
समस्तरोमकूपेषुनिजरश्मीन्दिवाकरः॥कालश्चदत्तवान्खड्गन्तस्याश्चर्मचनिर्मलम्॥२४॥
क्षीरोदश्चामलंहारमजरेचतथाम्बरे॥चूडामणिन्तथादिव्यङ्कुण्डलेकटकानिच॥२५॥
अर्द्धचन्द्रन्तथाशुभ्रंकेयूरान्सर्वबाहुषु॥नूपुरौविमलौतद्वद्ग्रैवेयकमनुत्तमं॥२६॥अङ्गुली-
यकरत्नानिसमस्तास्वङ्गुलीषुच॥विश्वकर्माददौतस्यैपरशुञ्चातिनिर्मलम्॥२७॥अस्त्राण्य
नेकरूपाणितथाभेद्यञ्चदंशनम्॥अम्लानपङ्कजाम्मालांशिरस्युरसिचापराम्॥२८॥अद
दज्जलधिस्तस्यैपङ्कजञ्चातिशोभनम्॥हिमवान्वाहनंसिंहंरत्नानिविविधानिच॥२९॥

॥राम:॥
॥३३॥

33

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ददावशून्यंसुरयापानपात्रंधनाधिपः॥ शेषश्चसर्वनागेशोमहामणिविभूषितम्॥ ३०॥ नाग
हारंददौतस्यैधत्तेयःपृथिवीमिमाम्॥ अन्यैरपिसुरैर्देवीभूषणैरायुधैस्तथा॥ ३१॥ सम्मानिताननो पु२
दोच्चैःसाट्टहासंमुहुर्मुहुः॥ तस्यानादेनघोरेणकृत्स्नमापूरितन्नभः॥ ३२॥ अमायतातिमहताप्र
तिशब्दोमहानभूत्॥ चुक्षुभुःसकलालोकाःसमुद्राश्चचकम्पिरे॥ ३३॥ चचालवसुधाचेलुःसक
लाश्चमहीधराः॥ जयेतिदेवाश्चमुदातामूचुःसिंहवाहिनीम्॥ ३४॥ तुष्टुवुर्मुनयश्चैनांभक्तिन
म्रात्ममूर्त्तयः॥ दृष्ट्वासमस्तंसंक्षुब्धंत्रैलोक्यममरारयः॥ ३५॥ सन्नद्धाखिलसैन्यास्तेसमुत्तस्थुरु
दायुधाः॥ आःकिमेतदितिक्रोधादाभाष्यमहिषासुरः॥ ३६॥ अभ्यधावततंशब्दमशेषैरसुरैर्वृतः

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ३५ ॥

सस्वनं ततो देवीम्व्याप्तलोकत्रयान्त्विषा ॥ ३७ ॥ पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ॥
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥ ३८ ॥ दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिता
म् ॥ ततः प्रववृते युद्धन्तया देव्या सुरद्विषाम् ॥ ३९ ॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ॥
महिसासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ४० ॥ युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ॥ रथाना
मयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४१ ॥ अयुध्यतायुतानाञ्च सहस्रेण महाहनुः ॥ पञ्चाशद्भिश्च
नियुतैरसिलोमा महासुरः ॥ ४२ ॥ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥ गजवाजिसहस्रौ
घैरनेकैः परिवारितः ॥ ४३ ॥ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥ विडालाख्योऽयुतानाञ्च

34

लो. ७१
॥ रामः ॥
॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पञ्चाशद्भिरथायुतैः ॥४४॥ युयुधे संयुगे तत्र रथानाम्परिवारितः ॥ अन्यैश्च तत्रायुतशो रथना-
गहयैर्वृताः ॥४५॥ युयुधुः संयुगे देव्या सह तत्र महासुराः ॥ कोटिकोटिसहस्रैस्तु रथानान्दन्ति-
नान्तथा ॥४६॥ हयानाञ्च वृतो युद्धे तत्राभून्महिषासुरः ॥ तोमरैर्भिन्दिपालैश्च शक्तिभिर्मु-
शलैस्तथा ॥४७॥ युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥ केचिच्च चिक्षिपुः शक्तीः केचित्पा-
शांस्तथापरे ॥४८॥ देवीं खड्गप्रहारैस्तु ते तां हन्तुम्प्रचक्रमुः ॥ सापि देवी ततस्तानि शस्त्राण्य-
स्त्राणि चण्डिका ॥४९॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥ अनायस्तानना देवी स्तू-
यमाना सुरर्षिभिः ॥५०॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥ सोपि क्रुद्धो धुतसटो देव्या

॥चं॥
॥३५॥

वाहनकेसरी॥५१॥चचारासुरसैन्येषुवनेष्विवहुताशनः॥निःश्वासान्मुमुचेयांश्चयुध्यमानारणो
म्बिका॥५२॥तएवसद्यःसम्भूतागणाःशतसहस्रशः॥युयुधुस्तेपरशुभिर्भिन्दिपालासिपट्टि
शैः॥५३॥नाशयन्तोसुरगणान्देवीशक्त्युपबृंहिताः॥अवादयन्तपटहान्गणाःशंखांस्तथा
पा४ परे॥५४॥मृदंगांश्चतथैवान्येतस्मिन्युद्धमहोत्सवे॥ततोदेवीत्रिशूलेनगदयाशक्तिवृष्टिभिः
॥५५॥खड्गादिभिश्चशतशोनिजघानमहासुरान्॥पातयामासचैवान्यान्घण्टास्वनविमो
हितान्॥५६॥असुरान्भुविपाशेनबध्वाचान्यानकर्षयत्॥केचिद्द्विधाकृतास्तीक्ष्णैःखड्ग
पातैस्तथापरे॥५७॥विपोथितानिपातेनगदयाभुविशेरते॥वेमुश्चकेचिद्रुधिरम्मुशलेनभृशंहताः॥५८॥

वि१

॥राम॥
॥३५॥

35

केचिन्निपतिताभूमौभिन्नाःशूलेनवक्षसि॥ निरन्तराःशरौघेणाकृताःकेचिद्रणाजिरे॥५९॥
सेनानुकारिणःप्राणान्मुमुचुस्त्रिदशार्दनाः॥ केषांञ्चिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे॥
॥६०॥ शिरांसिपेतुरन्येषामन्येमध्येविदारिताः॥ विछिन्नजंघास्त्वपरेपेतुरुर्व्याम्महासुराः॥
॥६१॥ एकबाह्वक्षिचरणाःकेचिद्देव्याद्विधाकृताः॥ छिन्नेपिचान्येशिरसिपतिताःपुनरुत्थि
ताः॥६२॥ कबन्धायुयुधुर्देव्यागृहीतपरमायुधाः॥ ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रिताः॥६३॥
कबन्धाश्छिन्नशिरसःखड्गशक्त्यृष्टिपाणयः॥ तिष्ठतिष्ठेतिभाषन्तोदेवीमन्येमहासुराः॥
॥६४॥ पातितैरथनागाश्वैरसुरैश्चवसुन्धरा॥ अगम्यासाभवत्तत्रयत्राभूत्समहारणः॥६५॥ ३७

॥ चं ॥
॥ ३६ ॥

शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः ॥ मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ३६ ॥
क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ॥ निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥ ३७
स च सिंहो महानादमुत्सृजन्धुतकेसरः ॥ शरीरेभ्योमरारीणामसूनिव विचिन्वति ॥ ३८ ॥ देव्या
गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ॥ यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ३९ ॥ ॥ इति
मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरसैन्यवधः ॥ २ ॥ उ १ श्लो ॥ ६९
श्री अथ ध्यानम् ॥ उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां रक्तालिप्तपयोध
रां जपवटीं विद्यामभीतिं वरम् ॥ हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं देवीम्

॥ गम: ॥
॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहिमांसुरान्तमुकुलाम्बरे समरस्मितानाम्॥ १॥ ऋषिरुवाच॥ १॥ निहन्यमानन्तत्सैन्यमवलोक्यम-
हासुरः॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम्॥ २॥ सदेवींशरवर्षेणाववर्षसमरेसुरः
॥ यथामेरुगिरेः शृङ्गन्तोयवर्षेणतोयदः॥ ३॥ तस्यच्छित्वाततोदेवीलीलयैवशरोत्करान्॥ जघा-
नतुरगान्वाणैर्यन्तारञ्चैववाजिनाम्॥ ४॥ चिच्छेदचधनुःसद्योध्वजञ्चातिसमुच्छ्रितम्॥ वि-
व्याधचैवगात्रेषुच्छिन्नधन्वानमाशुगैः॥ ५॥ सच्छिन्नधन्वाविरथोहताश्वोहतसारथिः॥ अभ्य-
धावततान्देवींखड्गचर्मधरोसुरः॥ ६॥ सिंहमाहत्यखड्गेनतीक्ष्णधारेणमूर्द्धनि॥ आजघानभुजेस-
व्येदेवीमप्यतिवेगवान्॥ ७॥ तस्याःखड्गोभुजम्प्राप्यपफालनृपनन्दन॥ ततोजग्राहशूलंसको-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥
॥ २१ ॥

[illegible]पादस्पृष्टालोचनः ॥ ८ ॥ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥ जाज्वल्यमानं तेजोभी रविबिम्ब
मिवाम्बरात् ॥ ९ ॥ दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ॥ तच्छूलं शतधा तेन नीतं स च महासुरः
॥ १० ॥ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥ आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ ११ ॥ सो
पि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ॥ हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥ १२ ॥ भ
ग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥ चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ १३ ॥
ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः ॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १४ ॥ युद्ध्य
मानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥ युयुधातेतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १५ ॥ ततो वेगा

37

॥ राम ॥
॥ २१ ॥

न्नवपुत्पत्निपत्यचमृगारिणा॥ करप्रहारेण शिरश्चामरस्य पृथक्कृतम्॥ उदग्रश्च रणे देव्याः शि-
लावृक्षादिभिर्हतः॥ दन्तमुष्टितलैश्चैव करालश्च निपातितः॥१७॥ देवी क्रुद्धा गदापातैश्चूर्णि-
यामास चोद्धतम्॥ वाष्कलम्भिन्दिपालेन वाणैस्ताम्रन्तथान्धकम्॥१८॥ उग्रास्यमुग्रवीर्यं-
श्च तथैव च महाहनुम्॥ त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी॥१९॥ बिडालस्यासिना काया-
त्पातयामास वै शिरः॥ दुर्धरं दुर्मुखञ्चोभौ शरैर्निन्ये यमक्षयम्॥२०॥ एवं संक्षीयमाणे तु स्व-
सैन्ये महिषासुरः॥ माहिषेण स्वरूपेण त्रासयामास तान् गणान्॥२१॥ कांश्चित्तुण्डप्रहारे-
ण खुरक्षेपैस्तथापरान्॥ लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्याञ्च विदारितान्॥२२॥ वेगेन कां-

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ३८ ॥

श्चिदपरान्नादेनभ्रमणेनच ॥ निःश्वासपवनेनान्यान्पातयामासभूतले ॥ २३ ॥ निपात्यप्रमथा-
नीकमभ्यधावतसोसुरः ॥ सिंहंहन्तुंमहादेव्याःकोपंचक्रेततोंबिका ॥ २४ ॥ सोपिकोपान्म-
हावीर्यःखुरक्षुण्णमहीतलः ॥ शृंगाभ्यांपर्वतानुच्चांश्चिक्षेपचननादच ॥ २५ ॥ वेगभ्रमण-
विक्षुण्णामहीतस्यव्यशीर्यत ॥ लांगूलेनाहतश्चाब्धिःप्लावयामाससर्वतः ॥ २६ ॥ धुतशृंगवि-
भिन्नाश्चखण्डंखण्डंययुर्घनाः ॥ श्वासानिलास्ताःशतशोनिपेतुर्नभसोचलाः ॥ २७ ॥ इति
क्रोधसमाध्मातमापतन्तंमहासुरं ॥ दृष्ट्वासाचण्डिकाकोपंतद्वधायतदाकरोत् ॥ २८ ॥ साक्षि-
प्त्वातस्यवैपाशंतंबबन्धमहासुरम् ॥ तत्याजमाहिषंरूपंसोपिबद्धोमहामृधे ॥ २९ ॥ ततःसिं-

38

॥ रामः ॥
॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

होऽभवत्सद्यो यावत्तस्याम्बिकाशिरः ॥ छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥ ३० ॥ तत एवा
शु पुरुषं देवी चिच्छेद सायकैः ॥ तं खड्गचर्मणा सार्द्धं ततः सोऽभून्महागजः ॥ ३१ ॥ करेण च महा
सिंहं तं चकर्ष जगर्ज च ॥ कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥ ३२ ॥ ततो महासुरो
भूयो माहिषं वपुरास्थितः ॥ तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥ ३३ ॥ ततः क्रुद्धा जग
न्माता चण्डिका पानमुत्तमम् ॥ पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३४ ॥ ननर्द चासु
रः सोऽपि बलवीर्यमदोद्धतः ॥ विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥ ३५ ॥ सा च
तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ॥ उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥ ३६ ॥

॥ चं ॥
॥ ३९ ॥

देव्युवाच ॥३७॥ गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम्॥ मया त्वयि हतेऽत्रैव गर्जिष्यन्त्या
शु देवताः॥३८॥ ऋषिरुवाच॥३९॥ एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम्॥ पादेनाक्रम्य
कण्ठे च शूलेनैनमताडयत्॥४०॥ ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः॥ अर्द्धनिष्क्रा
न्त एवासीद्देव्या वीर्येण संवृतः॥४१॥ अर्द्धनिष्क्रान्त एवासौ युध्यमानो महासुरः॥ तया महासि
ना देव्या शिरश्छित्त्वा निपातितः॥४२॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्॥ प्रहर्षञ्च पर
ञ्जग्मुः सकला देवतागणाः॥४३॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः॥ जगुर्गन्धर्वपतयो
ननृतुश्चाप्सरोगणाः॥४४॥ ॥इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये म ॥ राम: ॥
॥ ३९ ॥

39

हिषासुरवधः॥ ३॥ उ॥ १॥ श्लो॥ ४१॥ श्री अथध्यानम्॥ कालाभ्राभाङ्कटाक्षैररिकुलभय
दांमौलिबद्धेन्दुरेखांशंखञ्चक्रंकृपाणंत्रिशिखमपिकरैरुद्वहन्तींत्रिनेत्राम्॥ सिंहस्क
न्धाधिरूढात्रिभुवनमखिलन्तेजसापूरयन्तीध्यात्वादुर्गाञ्जयाख्यांत्रिदशपरिवृतांसेवि दे॰ ३१
तांसिद्धिकामैः॥ १॥ ऋषिरुवाच॥ १॥ शक्रादयःसुरगणानिहतेतिवीर्य्येतस्मिन्दुरात्मनि
सुरारिबलेचदेव्या॥ तान्तुष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रहर्षपुलकोद्गमचारुदे
हाः॥ २॥ देव्याययाततमिदंजगदात्मशक्त्यानिःशेषदेवगणशक्तिसमूहमूर्त्या॥ तामम्बिका
मखिलदेवमहर्षिपूज्यांभक्त्यानताःस्मविदधातुशुभानिसानः॥ ३॥ यस्याःप्रभावमतुलम्भ

॥ चं ॥
॥ ५० ॥

गवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलम्बलञ्च ॥ सा चण्डिकाखिलजगत्परिपालनाय ना
शाय चाशुभभयस्य मतिङ्करोतु ॥ ४ ॥ या श्रीः स्वयं सुकृतिनाम्भवनेष्वलक्ष्मीः पापात्म
नां कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वान्नताः स्म परिपा
लय देवि विश्वम् ॥ ५ ॥ किम्वर्णयाम तव रूपमचिन्त्यमेतत् किञ्चातिवीर्यमसुरक्षयकारि
भूरि ॥ किञ्चाहवेषु चरितानि तवाति यानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥ हेतुः समस्त
जगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदञ्जगदंश
भूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥ यस्याः समस्तसुरता समुदीरणेन तृप्तिम्

50

॥ रामः ॥
॥ ५० ॥

CC-0. In Public Domain. Digitization by eGangotri

चि॰ २

यातिसकलेषुमखेषुदेवी ॥ स्वाहासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्य्यसेत्वमतएव
जनैःस्वधाच ॥८॥ यामुक्तिहेतुरविचिन्त्यमहाव्रताच अभ्यस्यसेसुनियतेन्द्रियतत्वसारैः
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीपरमाहिदेवी ॥९॥ शब्दात्मिकासु
विमलर्ग्यजुषान्निधानमुद्गीथरम्यपदपाठवताञ्चसाम्नाम् ॥ देवीत्रयीभगवतीभवभाव
नायवार्त्ताचसर्वजगताम्परमार्त्तिहन्त्री ॥१०॥ मेधासिदेविविदिताखिलशास्त्रसारादुर्गा
सिदुर्गभवसागरनौरसङ्गा ॥ श्रीःकैटभारिहृदयैककृताधिवासागौरीत्वमेवशशिमौलिकृ
तःप्रतिष्ठा ॥११॥ ईषत्सहासममलम्परिपूर्णचन्द्रबिम्बानुकारिकनकोत्तमकान्तिकान्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥चं॥
॥५१॥

अत्यद्भुतम्प्रहृतमात्तरुषातयापिवङ्कम्बिलोक्यसहसामहिषासुरेण॥१२॥दृष्ट्वातुदेविकु
पितम्भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवियन्नसद्यः॥प्राणान्मुमोचमहिषस्तदतीवचित्र हि२
ङ्कैर्जीव्यतेहिकुपितान्तकदर्शनेन॥१३॥देवीप्रसीदपरमाभवतीभवायसद्योविनाशय
तिकोपवतीकुलानि॥विज्ञातमेतदधुनैवयदस्तमेतन्नीतम्बलंसुविपुलम्महिषासुर
प३ स्य॥१४॥तेसम्मताजनपदेषुधनानितेषांतेषांयशांसिनचसीदतिधर्मवर्गः॥धन्यास्तए ५।
वनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्रसन्ना॥१५॥धर्म्याणिदेविसकलानि
सदैवकर्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति॥स्वर्गम्प्रयातिचततोभवतीप्रसादाल्लोकत्र

॥रामः॥
॥५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येपिफलदाननुदेवितेन॥१६॥दुर्गेस्मृताहरसिभीतिमशेषजन्तोःस्वस्थैःस्मृतामतिमतीव
शुभान्ददासि॥दारिद्र्यदुःखभयहारिणिकात्वदन्यासर्वोपकारकरणायसदार्द्रचित्ता॥१७॥ दे.२
एभिर्हतैर्जगदुपैतिसुखन्तथैतेकुर्वन्तुनामनरकायचिरायपापम्॥संग्राममृत्युमधिग
म्यदिवंप्रयान्तुमत्वेतिनूनमहितान्विनिहंसिदेवि॥१८॥दृष्ट्वैवकिन्नभवतीप्रकरोतिभस्मस-
र्वासुरानरिषुयत्प्रहिणोषिशस्त्रम्॥लोकान्प्रयान्तुरिपवोपिहिशस्त्रपूताइत्थम्मतिर्भवति
तेष्वपितेतिसाध्वी॥१९॥खड्गप्रभानिकरविस्फुरणैस्तथोग्रैःशूलाग्रकान्तिनिवहेनदृशोसु
राणाम्॥यन्नागताविलयमंशुमदिन्दुखण्डयोग्याननन्तवविलोकयतान्तदेतत्॥२०॥

CC-0. In Public Domain. Digitization by eGangotri

दुर्वृत्तवृत्तशमनन्तवदेविशीलंरूपन्तथैवदपिचिन्त्यमतुल्यमन्यैः॥ वीर्यञ्चहन्तृहृतदेवप
राक्रमाणाम्वैरिष्वपिप्रकटितैवदयात्वयेत्थम्॥ २१॥ केनोपमाभवतुतेस्यपराक्रमस्यरूप
ञ्चशत्रुभयकार्य्यतिहारिकुत्र॥ चित्तेकृपासमरनिष्ठुरताचदृष्टात्वय्येवदेविवरदेभुवन
त्रयेपि॥ २२॥ त्रैलोक्यमेतदखिलंरिपुनाशनेनत्रातन्त्वयासमरमूर्द्धनितेपिहत्वा॥ नी
तादिवंरिपुगणाभयमप्यपास्तमस्माकमुन्मदसुरारिभवन्नमस्ते॥ २३॥ शूलेनपाहि
नोदेविपाहिखड्गेनचाम्बिके घण्टास्वनेननःपाहिचापज्यानिःस्वनेनच॥ २४॥ प्राच्यांरक्ष
प्रतीच्याञ्चचण्डिकेरक्षदक्षिणे॥ भ्रामणेनात्मशूलस्यउत्तरस्यान्तथेश्वरि॥ २५॥ सौम्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नि यानि रूपाणि त्रैलोक्ये विचरन्ति ते॥ यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम्॥ २६॥ खड्गशू
लगदादीनि यानि चास्त्राणि तेम्बिके॥ करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः॥ २७॥ ऋषिरुवा
च॥ २८॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः॥ अर्चिता जगतां धात्री तथा गन्धानुलेपनैः॥ २९॥ भ
क्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता॥ प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान्॥ ३०॥ दे
व्युवाच॥ ३१॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोभिवाञ्छितम्॥ ३२॥ देवा ऊचुः॥ ३३॥ भगवत्या
कृतं सर्वं न किंचिदवशिष्यते॥ ३४॥ यदयन्निहतः शत्रुरस्माकम्महिषासुरः॥ यदि चापि वरो देय
स्त्वयास्माकं महेश्वरि॥ ३५॥ संस्मृता संस्मृता त्वन्नो हिंसेथाः परमापदः यश्च मर्त्यः स्तवैरेभिः

CC-0. In Public Domain. Digitization by eGangotri

॥ दें ॥
॥ ४२ ॥

स्त्वां स्तोष्यत्यमलानने ॥ ३६ ॥ तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदां ॥ वृद्धयेस्मत्प्रसन्ना त्वं भ
वेथाः सर्वदांबिके ॥ ३७ ॥ ऋषिरुवाच ॥ ३८ ॥ इति प्रसादिता देवैर्जगतोर्थे तथात्मनः ॥ तथे
त्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥ ३९ ॥ इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥ देवी
देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४० ॥ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ॥ वधाय दु
ष्टदैत्यानां तथा शुंभनिशुंभयोः ॥ ४१ ॥ रक्षणाय च लोकानां देवानामुपकारिणी ॥ तच्छृणु
ष्व मयाख्यातं यथावत्कथयामि ते ॥ ४२ ॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाह
त्म्ये शक्रादिस्तुतिर्महिषासुरवधः समाप्तः ॥ ४ ॥ उ ॥ ५ ॥ अ ॥ २ ॥ श्लो ॥ ३५ ॥ इति मध्यमच

४३

॥ रामः ॥
॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रित्रंसम्पूर्णम् ॥ ॥अथवेदोक्तलक्ष्मीसूक्तंलिख्यते ॥ श्रीःॐनमस्त्वग्निरूपाये ॥ हरिःॐ ॥
हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ॥ चंद्रांहिरण्मयींलक्ष्मीञ्जातवेदोममावह ॥१
तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् ॥ यस्यांहिरण्यंविंदेयंगामश्वम्पुरुषानः
हम् ॥२॥ अश्वपूर्वांरथमध्यांहस्तिनादप्रमोदिनीम् ॥ श्रीयंदेवीमुपह्वयेश्रीर्मादेवीर्जुष
ताम् ॥३॥ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलन्तीं तृप्तांतर्पयन्तींपद्मस्थितांपद्मव-
र्णांतामिहोपह्वयेश्रियम् ॥४॥ चन्द्रांप्रभासांयशसाज्वलन्तींश्रियंलोकेदेवजुष्टामुदारा
म् ॥ तांपद्मनेमिंशरणमहम्प्रपद्येऽलक्ष्मीर्मेनश्यतान्त्वाम्वृणोमि ॥५॥ आदित्यवर्णे

॥चं॥
॥४८॥

तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः॥ तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बा
ह्या अलक्ष्मीः॥६॥ उपैतु मां देवसखः कीर्त्तिश्च मणिना सह॥ प्रादुर्भूतोस्मि राष्ट्रेस्मिन्की
र्त्तिमृद्धिं ददातु मे॥७॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्॥ अभूतिमसमृ
द्धिं च सर्वां निर्णुद मे गृहात्॥८॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्॥ ईश्वरीं
सर्वभूतानां तामिहोपह्वये श्रियम्॥९॥ मनसः काममाकूतिं वाचः सत्यमशीमहि॥ प
शूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥१०॥ कर्दमेन प्रजाभूता मयि सम्भव कर्दम॥ श्रि
यं वासय मे कुले मातरं पद्ममालिनीम्॥११॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृ

५५

॥राम॥
॥४८॥

हे। नि च देवींमातरंश्रियम्वासयमेकुले ॥ १२॥ आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनीम् ॥
सूर्य्यांहिरण्मयींलक्ष्मीञ्जातवेदोममावह ॥ १३॥ आर्द्रांपुष्करिणींपुष्टिंपिङ्गलाम्पद्ममालि
नीं ॥ चन्द्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥ १४॥ ताम्मआवहजातवेदोलक्ष्मीमनपगामि
नीम् ॥ यस्यांहिरण्यम्प्रभूतङ्गावोदास्योऽश्वान्विन्देयम्पुरुषानहम् ॥ १५॥ यःशुचिःप्रयतोभू
त्वाजुहुयादाज्यमन्वहम्। श्रियःपञ्चदशर्चञ्चश्रीकामःसततंजपेत्। पद्माननेपद्मिनिपद्मपत्रे
पद्मप्रियेपद्मदलायताक्षि ॥ विश्वप्रियेविष्णुमनोनुकूलेत्वत्पादपद्मम्मयिसंनिधत्स्व। पद्मानने
पद्मऊरुपद्माक्षीपद्मसम्भवे। तन्मेभजसिपद्माक्षीयेनसौख्यंलभाम्यहम् ॥ अश्वदायैगोदायै

CC-0. In Public Domain. Digitization by eGangotri

धनदायै मदा धने ॥ धनम्मे जुषतान्देवी सर्वकामांश्च देहि मे ॥ पुत्रपौत्रन्धनन्धान्यं हस्त्यश्वादिगवे
रथम् ॥ प्रजानाम्भवसी माता आयुष्मन्तङ्करोतु मे ॥ धनमग्निर्धनम्वायुर्धनंसूर्यो धनम्वसुः ॥
धनमीन्द्रो बृहस्पतिर्वरुणा न्धनमश्नुते ॥ वैनतेय सोमं पिब सोमम्पिबतु वृत्रहा ॥ सोमन्धनस्य सोमी
नो मह्यन्ददातु सोमिनः ॥ न क्रोधो न च मात्सर्यन्न लोभो नाशुभा मतिः ॥ भवन्ति कृतपुण्यानाम्भ
क्तानां श्रीसूक्तंजपेत् ॥ सरसिजनिलये सरोजहस्ते धवलतरांशुक गन्धमाल्यशोभे ॥ भगवति
हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ श्रीर्वर्चस्वमारोग्यमाविधात् ॥ पवमानंम
हीयते धान्यं धनं पशुं बहुपुत्रलाभं शतं संवत्सरं दीर्घमायुः ॥ इति वेदोक्तं लक्ष्मीसूक्तं ॥ अथगा

माठष्पर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्मो.१ गो.१

पत्नी ॥ ॐ महालक्ष्म्यां च विद्महे विष्णुपत्नीं च धीमहि तन्नो लक्ष्मीः प्रचोदयात् ॥ इति गायत्रीं जपे १
त् ॥ ततः प्रार्थना ॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियां ॥ विष्णुप्रियसखीं देवीं नमाम्य
च्युतवल्लभाम् ॥ इमे प्रियेप द्मा९ स्नेहसुगन्धवस्त्रः स्थलेपाद्यसिञ्चायमाने ॥ आमोदमानैरभिरामरम्यमा
नैपुनैःपोनैस्सवर्द्धतां दीर्घमायुः ॥ आनन्दः कर्दमः श्रीदश्चिक्लीत इव समे गृहे ॥ ऋषयः श्रियःपुत्राः
श्च स्वयं श्रीर्देवदेवता ॥ इति प्रार्थयेत् ॥ ततो रुद्रयामलोक्तमार्कण्डेयपुराणोक्तं सूक्तं पठेत् ॥ श्री
ॐ नमश्चण्डिकायै ॥ अथ रुद्रयामलोक्तं लक्ष्मीसूक्तम् ॥ अथाञ्जलिं समाधाय हरिः श्रीवाच
विश्वकृत् ॥ हरिरुवाच ॥ परात्परेशी जगदादिभूतां वरां वरेण्यां वरदां वरिष्ठाम् ॥ विश्वेश्व

॥ चं ॥
॥ ५६ ॥

रीम्बहुवाग्भिः प्रगीतान्त्वां विश्वयोनिं शरणम्प्रपद्ये ॥ १ ॥ श्रियं समस्तैकनिवासभूतां महासुल
क्ष्मीं स्वरणीं धरणाम् ॥ अनादिमादिम्परमार्थरूपान्त्वाम्विश्वयोनिं शरणम्प्रपद्ये ॥ २ ॥ एका
मनेकाम्विविधांप्रकार्याप्रकारणाञ्चिन्मयरूपरूपिणीम् ॥ कल्याणरूपाञ्च शिवप्रदान्त्वां
विश्वयोनिं ० ॥ ३ ॥ सर्वाश्रयां सर्वजगन्निवासां श्रीमन्महालक्ष्मीमनादिदेवीम् ॥ शक्तिस्वरूपां
च शिवस्वरूपान्त्वाम् ० ॥ ४ ॥ कामाभिधां श्रीमधिवामभूतां स्वरूपिणीम्बीजकपिप्रभावाम् ॥
कलांशबीजाम्परमार्थसञ्ज्ञां रमाम्विशालाङ्कमलाधिवासाम् ॥ ५ ॥ वैश्वानरह्रींसहितेन दे
वीं श्रीमन्त्रराजेन विराजमानाम् ॥ सर्वार्थदात्रीम्परमाम्प्रविज्ञान्त्वाम्विश्व ० ॥ ६ ॥ त्रिकोणपञ्चा

॥ राम: ॥
॥ ५६ ॥

रखुगप्रभावांषड्कोशामिस्त्रांश्छिदशारयुक्ताम् ॥ अष्टारचक्रादिनिवासभूतां त्वाम्बि०॥७॥ पुन
र्दशारक्षितयेन युक्तामन्वारकोशानध्वतभूगृहाम्ब ॥ यत्राधिवासामपियन्त्ररूपान्त्वां०॥८
सम्भावितांसर्वदान्यासगम्यांमर्वस्वरूपामपिमर्वसेव्याम् ॥ सर्वासरन्यासवशाम्बरिष्ठान्त्वां
०॥९॥ सृष्टिस्थितिप्रलयात्मैस्त्वबीजैर्मांसम्विधायप्रजपन्तियेत्वाम् ॥ तएवराजेन्दुनिघृ
ष्टपादाविद्याधराद्यैश्चयशोलभन्ते ॥१०॥ प्रपूज्ययत्त्वाम्बिधिनामहेशिपुराणपाःसुपूज्याःपरमाः
सुभाग्याः ॥ जपन्तियेत्वांविविधार्घदात्रीन्तएवधन्याःकुलमार्गनिष्ठाः ॥११॥ जानन्तिते०
किंपशवःस्वरूपाब्रह्मादिगीतंमहिमामहेशि ॥ केचिन्महान्तोनिजधर्मलाभाञ्ज्ञानन्तिते०

॥ वं ॥
॥ ४१ ॥

देवि परं तु धाम ॥ १२ ॥ विधाय कुण्डं विधिना च वेदीं सौगन्धिहोमं सफलं प्रकुर्य्यात् ॥ त्वत्तो यशा
ज्ञाप्यते भाग्यमन्वये येषां सुरेन्द्रैरपि दुर्लभम् ॥ १३ ॥ पुनस्तु वक्ति प्रसन्ता विश्वमातस्त्वत्तो नैरुदोरेः
कुलयोगयुक्ताः ॥ नस्येव धन्याः परमार्थभाजो भोगश्च मोक्षश्च स्थिरास्ति तेषाम् ॥ १४ ॥ ऋषिरुवा
च ॥ इति स्तुता महादेवी महालक्ष्मी रत्नर्द्धिसः ॥ चतुर्भुजा त्रिनयना महिषासुरघातिनीम् ॥
॥ १५ ॥ अपश्यन्मन्महालक्ष्मीः प्रसन्नास्तु तिगौरवात् ॥ उवाच तस्मिन् शोभाढ्या नारायणाम
जं शुभम् ॥ १६ ॥ श्रीदेव्युवाच ॥ वरम्वरय देवेश नारायण सनातन ॥ दास्याम्यद्य तु तव यन्त
वस्तु त्वया वशीकृता ॥ १७ ॥ श्रीनारायण उवाच ॥ मातः परमकारुण्ये महालक्ष्मी वरप्रदे ॥ कुल

५२
/
47

चारेमनोमेघट्टरूत्त्वामस्तुतथाशिवे ॥ १९ ॥ तवसूक्तंचसफलंत्वत्प्रीतिकारकं ॥ श्रीदेव्युवाच ॥ स्व
मस्तुमहाभागनारायणसनातन ॥ २० ॥ सूक्तमेतद्विनायस्तुपठेत्सप्तशतींनरः ॥ सयातिपरमंघो
रन्नरकन्दारुणंकिल ॥ २१ ॥ लिप्यतेपरमापापान्ममकोपविचूर्णितः ॥ लक्ष्मीसूक्तंविनासप्तशती
स्तोत्रंनिषिध्यते ॥ २२ ॥ ऋषिरुवाच ॥ एवमुक्त्वाततोदेवीतत्रान्तर्भावंगतानृप ॥ २३ ॥ इतिश्रीरुद्रया
मलेघरतन्त्रेविष्णुभाषितम्महालक्ष्मीसूक्तंसम्पूर्णम् ॥ ॥ अथमार्कण्डेयपुराणोक्तम्महालक्ष्मी
सूक्तम्विष्णुभाषितम् ॥ श्रीमहालक्ष्म्यैनमः ॥ ॐ ॥ विष्णुरुवाच ॥ यांमामनन्तिमुनयः प्रकृतिम्पु
राणीम्विद्येतियांश्रुतिरहस्यविदोगृणन्ति ॥ तामर्द्धपल्लवितशंकररूपरूढान्देवीमनन्यशरणाः

CC-0. In Public Domain. Digitization by eGangotri

॥वे॥ ॥४८॥ गुम्फः १ पा.

शरणाम्बुपद्ये ॥१॥ अम्बस्त्वेषुतवतेहृतिनो पिनित्यङ्कुराठीभवन्ति वचसामपि कुण्ठनानि ॥ उम्म
स्यमेस्तु तिरिपश्वनपुञ्जरूपाम्बा वांस्त्वलन्सहृदयाम्म वतिन्बुमोति ॥२॥ मायेतिनाद इति विन्दु
रिती न्दुरेखाँ रूपेतिवाभवतनूरिति मातृकेति ॥ निस्पन्दमानसुखबोधसुधास्वरूपा विद्योतसे मन
सिभागपवतां जनानाम् ॥३॥ आविर्भवत्पुलकसंहतिभिः शरीरैर्निस्पन्दमानसलिलैर्नयनैश्च नि-
त्यम् ॥ वाग्भिश्च गद्गदपदाभिरुपासते ये पादौ तवाम्ब भुवनेषु त एव धन्याः ॥४॥ वक्त्रं यदुद्यतमभिष्टु
तये भवत्या निम्नं न मो यदपि देवि शिरः करोति ॥ चेतश्च यत्त्वयि परायणमम्ब तानि कस्यापि कैरपि भ
वन्ति तपोविशेषैः ॥५॥ मूलालवालकुहरादुदिता भवानि निर्भिद्य षट्सरसिजानि तटिल्लतेव ॥ भूयो

48

॥राम:॥ ॥४९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पितत्रविश्रसिङ्कवमराउलेन्दुनिस्यन्दमानपरमामृततोयरूपा ॥ ६ ॥ दग्धंययासमदनम्मेकमनेकधा
तेमुग्धेकयासविधिरङ्कुरयाञ्चकार ॥ धत्तेनत्वाप्रभृतिदेविललाटनेत्रंसम्यंह्रियैवकुटिलीकृतमि
न्दुमौलिः ॥ ७ ॥ अभ्यासतस्सम्भवमनाकलितान्वयंहिभिक्षाकृपालिनमवाममसमद्वितीयम् ॥ श्र्व
ङ्करमहरामङ्गलतोभवत्याः शम्भुङ्कएवविबुधेगिरिराजकन्ये ॥ ८ ॥ चर्माम्बरन्त्वशवभस्मविलेप
नन्त्वभिक्षाटनन्त्वरटनन्त्वपरेतभूमौ ॥ वेतालसंहतिपरिग्रहताचशंम्भोःशोभाम्बिभर्त्तिगिरि
जेतवसाहचर्य्यात् ॥ ९ ॥ यास्वतेलक्ष्मीस्त्वपन्यावहोरात्रेपार्श्वेनसत्त्वाशिरूपमश्विनोर्व्याप्तम्
इस्रन्निषाराममुम्मइष्यारासर्वलोकम्मइषारा ॥ १० ॥ गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषि

भुकुली २ ग.

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ४९ ॥

रीम्॥ ईश्वरींसर्वभूतानान्त्वामिहोपहुयेश्रियम्॥ ११॥ ऋषिरुवाच॥ इतिस्तुत्यवमानेस्मवि-
ष्णोरमिततेजसः॥ प्रादुर्भूतामहालक्ष्मीर्महिषासुरघातिनी॥ १२॥ देव्युवाच॥ व्रियतामिषि
तोदेववरस्तेकमलापते॥ इत्याम्यद्वरजुष्यन्नवसत्त्ववशीकृता॥ १३॥ भगवानुवाच॥ यदिदा-
स्यसिमेदेविवरानुसुकरुणागमान्॥ त्वय्येवविमलाभक्तिःसदामेस्तुकृपामयि॥ १४॥ किं
चित्त्वक्तेविधातव्याकापिसिद्धिरनुत्तमा॥ यत्त्वसादात्त्वसन्नाल्लब्धंवस्त्यानन्ददायिनी॥ १५॥
देव्युवाच॥ एवमस्तुमहाविष्णोकीर्तिस्तेघनपायिनी॥ अतुलस्त्वप्रतापोहिसदाभवतुसत्त-
म॥ १६॥ महालक्ष्मीस्तवम्मृतेदेवींयस्त्वाशिवकाम्पठेत्॥ मातृगामीसभवतुपापंविन्दतिष

49

॥ राम ॥
॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

फलम् ॥१७॥ सूक्तेस्मिन्कापि विमलास्यापिता मिसिद्धिरुत्तमा ॥ यस्याः प्रसादतो जन्तुर्भुक्तिं मुक्तिं
च विन्दति ॥१८॥ इति ते व्याहृतं सत्यं विज्ञातव्यं रमापते ॥ तवास्तु विमलाकीर्त्तिः सूक्तपाठानुभाव
तः ॥१९॥ ऋषिरुवाच ॥ इत्युक्त्वान्तर्धिमापेदे महालक्ष्मीर्वरप्रदा ॥ नारायणं जगन्नाथं सं बो
ध्य वरुधान्नृप ॥२०॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये विष्णुप्रोक्तं महा
लक्ष्मीसूक्तं संपूर्णम् ॥ इति मध्यमचरित्रं समाप्तम् ॥ श्री अथ उत्तरचरित्रं ॥ ॐ नमश्चण्डि
कायै ॥ श्री ॐ उत्तरचरित्रस्य रुद्रऋषिः अनुष्टुप्छन्दः महासरस्वती देवता भीमा शक्तिः क्लीं
भ्रामरी बीजं सूर्यस्तत्त्वं सामवेदः मूर्त्तिः श्वेतध्यानम् महासरस्वतीप्रीत्यर्थे जपे विनियोगः ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथध्यानम्॥ घण्टाशूलहलानिशंखमुशलेचक्रंधनुःसायकंहस्ताब्जैर्दधतीन्घनान्तविलसच्छी
तांशुतुल्यप्रभाम्॥ गौरीदेहसमुद्भवांत्रिजगतामाधारभूतांमहापूर्वामत्रसरस्वतीमनुभजेशु
म्भादिदैत्यार्दिनीम्॥ ऋषिरुवाच॥१॥ पुराशुम्भनिशुम्भाभ्यामसुराभ्यांशचीपतेः॥ त्रैलोक्यं
यज्ञभागाश्चहृतामदबलाश्रयात्॥२॥ तावेवसूर्य्यतांतद्वदधिकारन्तथैन्दवम्॥ कौबेरमथया
म्यञ्चचक्रातेवरुणस्यच॥३॥ तावेवपवनर्द्धिंचचक्रतुर्वह्निकर्मच॥ ततोदेवाविनिर्धूताभ्रष्ट
राज्याःपराजिताः॥४॥ हृताधिकारास्त्रिदशास्ताभ्यांसर्वेनिराकृताः॥ महासुराभ्यान्तान्देवींसंस्म
रन्त्यपराजिताम्॥५॥ तयास्माकंवरोदत्तोयथापत्सुस्मृताखिलाः॥ भवतान्नाशयिष्यामित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्स्मरात्परमापदः ॥६॥ इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ॥ जग्मुस्तत्र ततो देवीं विष्णुमायां प्र-
तुष्टुवुः ॥७॥ देवा ऊचुः ॥८॥ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः प्रण-
ताः स्म ताम् ॥९॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥ ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै स-
ततं नमः ॥१०॥ कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ॥ नैरृत्यै भूभृतां लक्ष्म्यै सर्वाण्यै ते
नमो नमः ॥११॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं न-
मः ॥१२॥ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥१३॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै ॥१४॥ नमस्तस्यै ॥१५॥ नमस्तस्यै नमो नमः

॥चं॥
॥५१॥

॥१६॥ यादेवी सर्वभूतेषु चेतनेत्यभिधीयते॥ नमस्तस्यै॥१७॥नमस्तस्यै॥१८॥ नमस्तस्यैनमोनमः
॥१९॥ यादेवी सर्वभूतेषु बुद्धिरूपेण संस्थिता॥ नमस्तस्यै॥२०॥नमस्तस्यै॥२१॥नमस्तस्यैनमोन
मः॥२२॥ यादेवी सर्वभूतेषु निद्रारूपेण संस्थिता॥ नमस्तस्यै॥२३॥नमस्तस्यै॥२४॥नमस्तस्यैन
मोनमः॥२५॥ यादेवी सर्वभूतेषु क्षुधारूपेण संस्थिता॥ नमस्तस्यै॥२६॥नमस्तस्यै॥२७॥नमस्त
स्यैनमोनमः॥२८॥ यादेवी सर्वभूतेषु छायारूपेण संस्थिता॥ नमस्तस्यै॥२९॥नमस्तस्यै॥३०
नमस्तस्यैनमोनमः॥३१॥ यादेवी सर्वभूतेषु शक्तिरूपेण संस्थिता॥ नमस्तस्यै॥३२॥नमस्त
स्यै॥३३॥नमस्तस्यैनमोनमः॥३४॥ यादेवी सर्वभूतेषु तृष्णारूपेण संस्थिता॥ नमस्तस्यै॥३५

॥रामः॥
॥५१॥

नमस्तस्यै ॥ ३६ ॥ नमस्तस्यै नमो नमः ॥ ३७ ॥ या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ॥ नमस्त-
स्यै ॥ ३८ ॥ नमस्तस्यै ॥ ३९ ॥ नमस्तस्यै नमो नमः ॥ ४० ॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥
नमस्तस्यै ॥ ४१ ॥ नमस्तस्यै ॥ ४२ ॥ नमस्तस्यै नमो नमः ॥ ४३ ॥ या देवी सर्वभूतेषु लज्जारूपेण सं-
स्थिता ॥ नमस्तस्यै ॥ ४४ ॥ नमस्तस्यै ॥ ४५ ॥ नमस्तस्यै नमो नमः ॥ ४६ ॥ या देवी सर्वभूतेषु शा-
न्तिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ४७ ॥ नमस्तस्यै ॥ ४८ ॥ नमस्तस्यै नमो नमः ॥ ४९ ॥ या देवी स-
र्वभूतेषु श्रद्धारूपेण संस्थिता ॥ नमस्तस्यै ॥ ५० ॥ नमस्तस्यै ॥ ५१ ॥ नमस्तस्यै नमो नमः ॥ ५२ ॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ५३ ॥ नमस्तस्यै ॥ ५४ ॥ नमस्तस्यै नमो

CC-0. In Public Domain. Digitization by eGangotri

नमः॥५५॥यादेवीसर्वभूतेषु·लक्ष्मीरूपेणसंस्थिता॥नमस्तस्यै॥५६॥नमस्तस्यै॥५७॥नमस्तस्यै
नमोनमः॥५८॥यादेवीसर्वभूतेषु·वृत्तिरूपेणसंस्थिता॥नमस्तस्यै॥५९॥नमस्तस्यै॥६०॥
नमस्तस्यैनमोनमः॥६१॥यादेवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता॥नमस्तस्यै॥६२॥नमस्तस्यै
॥६३॥नमस्तस्यैनमोनमः॥६४॥यादेवीसर्वभूतेषु·दयारूपेणसंस्थिता·॥नमस्तस्यै॥६५॥नम
स्तस्यै॥६६॥नमस्तस्यैनमोनमः॥६७॥यादेवीसर्वभूतेषु·तुष्टिरूपेणसंस्थिता·॥नमस्तस्यै॥
॥६८॥नमस्तस्यै॥६९॥नमस्तस्यैनमोनमः॥७०॥यादेवीसर्वभूतेषु·मातृरूपेणसंस्थिता·
नमस्तस्यै॥७१॥नमस्तस्यै॥७२॥नमस्तस्यैनमोनमः॥७३॥यादेवीसर्वभूतेषु·भ्रांतिरूपेणसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थिता॥ नमस्तस्यै॥ ७४॥ नमस्तस्यै॥ ७५॥ नमस्तस्यै नमो नमः॥ ७६॥ इन्द्रियाणामधिष्ठात्री भू
तानां चाखिलेषु या॥ भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः॥ ७७॥ चितिरूपेण या कृत्स्नमे
तद्व्याप्य स्थिता जगत्॥ नमस्तस्यै॥ ७८॥ नमस्तस्यै॥ ७९॥ नमस्तस्यै नमो नमः॥ ८०॥ स्तुता सुरैः
पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्य
भिहन्तु चापदः॥ ८१॥ या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते॥ या च स्मृ
ता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः॥ ८२॥ ऋषिरुवाच॥ ८३॥ एवं स्त
वादियुक्तानां देवानां तत्र पार्वती॥ स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन॥ ८४॥ साब्रवी

CC-0. In Public Domain. Digitization by eGangotri

तानसुरानसुभूर्भवद्भिः स्तूयते च का॥ शरीरकोशात्तस्याः समुद्भूताब्रवीच्छिवा॥८५॥ स्तोत्रं ममैत
त्क्रियते शुम्भदैत्यनिराकृतैः॥ देवैः समेतैः समरे निशुम्भेन पराजितैः॥८६॥ शरीरकोशाद्यत्तस्याः
पार्वत्या निःसृताम्बिका॥ कौशिकीति समस्तेषु ततो लोकेषु गीयते॥८७॥ तस्यां विनिर्गता
यान्तु कृष्णाभूत्सापि पार्वती॥ कालिकेति समाख्याता हिमाचलकृताश्रया॥८८॥ ततोम्बिकां
परं रूपं बिभ्राणां सुमनोहरम्॥ ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः॥८९॥ ताभ्यां
शुम्भाय चाख्याता अतीव सुमनोहरा॥ काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम्॥९०॥
नैव तादृक्क्वचिद्रूपं दृष्टं केनचिदुत्तमम्॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर॥९१॥ स्त्रीर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्तमतिवार्वंगी द्योतयन्ती दिशास्त्विषा ॥ सा तु तिष्ठति दैत्येन्द्र तां भवान्द्रष्टुमर्हति ॥ ९२ ॥ यानि र-
त्नानि मणयो गजाश्वादीनि वै प्रभो ॥ त्रैलोक्ये तु समस्तानि साम्प्रतम्भान्ति ते गृहे ॥ ९३ ॥ ऐरा-
वतः समानीतो गजरत्नं पुरंदरात् ॥ पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥ विमानं हंस-
संयुक्तमेतत्तिष्ठति तेङ्गणे ॥ रत्नभूतमिहानीतं यदासीद्वेधसोद्भुतम् ॥ ९५ ॥ निधिरेष महापद्मः
समानीतो धनेश्वरात् ॥ किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपंकजाम् ॥ ९६ ॥ छत्रन्ते वारुणं गे-
हे काञ्चनस्रावि तिष्ठति ॥ तथायं स्यन्दनवरो यः पुरासीत्प्रजापतेः ॥ ९७ ॥ मृत्योरुत्क्रान्तिदा
नाम शक्तिरीश त्वया हृता ॥ पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ९८ ॥ निशुम्भस्याब्धि-

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ५८ ॥

जाताश्चसमस्तारत्नजातयः ॥ वह्निरपिददौतुभ्यमग्निशौचेचवाससी ॥ ९९ ॥ एवंदैत्येन्द्ररत्नानि
समस्तान्याहृतानिते ॥ स्त्रीरत्नमेषाकल्याणीत्वयाकस्मान्नगृह्यते ॥ १०० ॥ ऋषिरुवाच ॥ १ ॥
निशम्येतिवचःशुम्भःसतदाचण्डमुण्डयोः ॥ प्रेषयामाससुग्रीवंदूतंदेव्यामहासुरम् ॥ २ ॥ इ
तिचेतिचवक्तव्यासागत्वावचनान्मम ॥ यथाचाभ्येतिसम्प्रीत्यातथाकार्यंत्वयालघु ॥ ३ ॥
सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने ॥ सादेवीतान्ततःप्राहश्लक्ष्णम्मधुरयागिरा ॥ ४ ॥
दूतउवाच ॥ ५ ॥ देविदैत्येश्वरःशुम्भस्त्रैलोक्येपरमेश्वरः ॥ दूतोहम्प्रेषितस्तेनत्वत्सकाशमि-
हागतः ॥ ६ ॥ अव्याहताज्ञःसर्वासुयःसदादेवयोनिषु ॥ निर्जिताखिलदैत्यारिःसयदाहशृ-

54

॥ राम ॥
॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राजधृतन् ॥ ७ ॥ मम त्रैलोक्यमखिलम्मम देवा वशानुगाः । यज्ञभागानहं सर्वानुपाश्नामि पृथक्
पृथक् ॥ ८ ॥ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥ तथैव गजरत्नानि हृत्वा देवेन्द्रवाहनम् ॥
॥ ९ ॥ क्षीरोदमथनोद्भूतमश्वरत्नम्ममामरैः ॥ उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥ १० ॥
यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ॥ रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ ११ ॥ स्त्रीरत्नभू-
तान्त्वां देवि लोके मन्यामहे वयम् ॥ सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥ १२ ॥ माम्वाम-
मानुजं वापि निशुम्भमुरुविक्रमं ॥ भज त्वञ्चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥ १३ ॥ परमैश्वर्य-
मतुलम्प्राप्स्यसे मत्परिग्रहात् ॥ एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ १४ ॥ ऋषिरुवाच ॥ १५

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥ इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्य्यते जगत् ॥ १६ ॥ देव्युवा
॥ ५५ ॥ च ॥ १७ ॥ सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ॥ त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि
तादृशः ॥ १८ ॥ किन्त्वत्र यत्प्रतिज्ञातं मिथ्या तत् क्रियते कथम् ॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या
कृता पुरा ॥ १९ ॥ यो मां जयति संग्रामे यो मे दर्प्पं व्यपोहति ॥ यो मे प्रतिबलो लोके स मे भर्त्ता भवि-
ष्यति ॥ २० ॥ तदागच्छतु शुम्भोत्र निशुम्भो वा महासुरः ॥ मां जित्वा किं चिरेणात्र पाणिं गृह्णातु 55
मे लघु ॥ २१ ॥ दूत उवाच ॥ २२ ॥ अवलिप्तासि मैवं त्वं देवी ब्रूहि ममाग्रतः ॥ त्रैलोक्ये कः पुमांस्ति-
ष्ठेदग्रे शुंभनिशुंभयोः ॥ २३ ॥ अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥ तिष्ठन्ति सम्मुखे दे- ॥ रामः ॥
॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विकिम्पुनः स्त्री त्वमेकिका ॥ २४ ॥ इन्द्राद्याः सकला देवास्तस्थुर्येषान्न संयुगे ॥ शुम्भादीनां कथं
तेषां स्त्री प्रयास्यसि सम्मुखम् ॥ २५ ॥ सा त्वङ्गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ॥ केशाकर्ष
मा ३ णनिर्द्धूतगौरवा मा गमिष्यसि ॥ २६ ॥ देव्युवाच ॥ २७ ॥ एवमेतद्बली शुम्भो निशुम्भश्चातिवी
र्य्यवान ॥ किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ २८ ॥ स त्वङ्गच्छ मयोक्तं ते यदेतत्सर्व
माद्दृतः ॥ तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ॥ ॥ इति मार्कण्डेयपुराणे सावर्णिके
मन्वन्तरे देवीमाहात्म्ये देव्या दूतसम्वादः ॥ ५ ॥ उ ॥ ९ ॥ अ ॥ ६६ ॥ श्लो ॥ ५८ ॥ ॐ नमश्चण्डि
कायै ॥ अथ ध्यानम् ॥ सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः शंखं चक्रधनुःशरां

॥चं॥
॥५६॥

स्वरश्चतीनेत्रैस्त्रिभिः शोभिता ॥ आमुक्ताङ्गदहारकंकणरणत्कांचीक्वणन्नूपुरां दुर्गां दुर्गतिहा
रिणींभवतु नो रत्नोल्लसत्कुण्डला ॥६॥ ऋषिरुवाच ॥१॥ इत्याकर्ण्य वचो देव्याः स दूतोमर्षपू
रितः ॥ समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥२॥ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् त
तः ॥ सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥३॥ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥४॥ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठते परः ॥
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥५॥ ऋषिरुवाच ॥६॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो
धूम्रलोचनः ॥ वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥७॥ स दृष्ट्वा तां ततो देवीं तुहिनाच

86

॥राम:॥
॥५६॥

लसंस्थिताम् ॥ जगादोच्चैः प्रयाहीतिमूलंशुम्भनिशुम्भयोः ॥ ८ ॥ नचेत्प्रीत्या
द्यभवतिमद्भर्तारमुपैष्यति । ततोवलान्नयाम्येषकेशाकर्षणविह्वलाम् ॥ ९
देव्युवाच ॥ १० ॥ दैत्येश्वरेणप्रहितोवलवान्वलसम्वृतः ॥ वलान्नयसिमामेवं
ततःकिन्तेकरोम्यहम् ॥ ११ ॥ ऋषिरुवाच ॥ १२ ॥ इत्युक्तःसोभ्यधावत्तामसुरो
धूम्रलोचनः ॥ हुंकारेणैवतम्भस्मसाचकाराम्बिकाततः ॥ १३ ॥ अथक्रुद्धं महा
सैन्यमसुराणान्तथाम्बिका ॥ ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः ॥ १४ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ दे ॥ ततोधुतसटःकोपात्कृत्वानादंसुभैरवम् ॥ पपातासुरसेनायांसिंहोदेव्याःस्ववाहनः
॥ ५७ ॥ ॥१५॥ कांश्चित्करप्रहारेणदैत्यानास्येनचापरान् ॥ आक्रान्त्याचाधरेणान्यान् ज
घानसमहासुरान् ॥१६॥ केषाञ्चित्पाटयामासनखैःकोष्ठानिकेसरी ॥ तथातल
प्रहारेणशिरांसिकृतवान्पृथक् ॥१७॥ विछिन्नबाहुशिरसःकृतास्तेनतथा 58
परे ॥ पपौचरुधिरङ्कोष्ठादन्येषांधुतकेशरः ॥१८॥ क्षणेनतद्बलंसर्वंक्षयंनीतं
महात्मना ॥ तेनकेसरिणादेव्यावाहनेनातिकोपिना ॥१९॥ श्रुत्वातमसुरन्देव्यानि ॥ राम ॥
हतन्धूम्रलोचनम् ॥ बलंचक्षयितङ्कृत्स्नन्देवीकेसरिणाततः ॥२०॥ चुकोपदैत्याधिपतिः ॥ ५७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शुम्भः प्रस्फुरिताधरः ॥ आज्ञापयामास चतौ चण्डमुण्डौ महासुरौ ॥ २१ ॥ हे चण्ड हे मुण्ड
बलैर्बहुलैः परिवारितौ ॥ तत्र गच्छत गत्वा च सा समानीयतां लघु ॥ २२ ॥ केशेष्वाकृष्य
बध्वा वा यदि वः संशयो युधि ॥ तदशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ २३ ॥ तस्यां ह
तायां दुष्टायां सिंहे च विनिपातिते ॥ शीघ्रमागम्यतां बध्वा गृहीत्वा तामथाम्बिकाम्
॥ २४ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये शुम्भनिशुम्भसेनानी
धूम्रलोचनवधः ॥ ६ ॥ उ ॥ ४ ॥ श्लो ॥ २० ॥ श्रीः ॥ अथ ध्यानम् ॥ ध्यायेहं रत्नपीठे सुक
कलपठितं शृण्वतीं श्यामलाङ्गीं न्यस्तैकांघ्रिं सरोजे शशिशकलधरां वल्लकीं वाद

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥ यन्तीम्॥ कल्हारबद्धमालानियमितविलसच्चूलिकांरक्तवस्त्रांमातङ्गींशंखपात्रांमधु
॥५८॥ रमदपदांचित्रकोद्भासिमालाम्॥ ७॥ ऋषिरुवाच॥ १॥ आज्ञप्तास्ततोदैत्याश्चण्ड
मुण्डपुरोगमाः॥ चतुरङ्गबलोपेताययुरभ्युद्यतायुधाः॥ २॥ ददृशुस्तेततोदेवीमीष
द्धासांव्यवस्थिताम्॥ सिंहस्योपरिशैलेन्द्रशृङ्गेमहतिकाञ्चने॥ ३॥ तेदृष्ट्वातांस
मादातुमुद्यमंचक्रुरुद्यताः॥ आकृष्टचापासिधरास्तथान्येतत्समीपगाः॥ ४॥ ततः ४४
कोपंचकारोच्चैरंबिकातानरीन्प्रति॥ कोपेनचास्यावदनम्मषीवर्णमभूत्तदा॥ ५॥ ॥ राम ॥
भ्रुकुटीकुटिलात्तस्याललाटफलकाद्द्रुतम्॥ कालीकरालवदनाविनिष्क्रान्तासिपा ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

य

पि

शिनी॥ ६॥ विचित्रखट्वांगधरा नरमालाविभूषणा॥ द्वीचर्मपरिधाना शुष्कमांसातिभै
रवा॥ ७॥ अतिविस्तारवदना जिह्वाललनभीषणा॥ निमग्नारक्तनयना नादापूरितदि
ङ्मुखा॥ ८॥ सा वेगेनाभिपतिता घातयन्ती महासुरान्॥ सैन्ये तत्र सुरारीणामभक्षयत
तद्बलम्॥ ९॥ पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान्॥ समादायैकहस्तेन मु
खे चिक्षेप वारणान्॥ १०॥ तथैव योधन्तुरगै रथं सारथिना सह॥ निक्षिप्य वक्त्रे दशनै
श्चर्वयन्त्यतिभैरवम्॥ ११॥ एकं जग्राह केशेषु ग्रीवायामथ चापरम्॥ पादेनाक्रम्य चै
वान्यमुरसान्यमपोथयत्॥ १२॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः॥ मुखे

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ५६ ॥

नजग्राहरुषादशनैर्मथितान्यपि ॥ १३ ॥ बलीनान्तद्बलंसर्वमसुराणाम्महात्मनाम्
॥ ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥ १४ ॥ असिनानिहताःकेचित्केचित्
खट्वाङ्गताडिताः ॥ जग्मुर्विनाशमसुरादन्ताग्राभिहतास्तथा ॥ १५ ॥ क्षणेनतद्
बलंसर्वमसुराणांनिपातितम् ॥ दृष्ट्वाचण्डोभिदुद्रावतांकालीमतिभीषणाम् ॥ १६ ॥ श
रवर्षैर्महाभीमैर्भीमाक्षींतांमहासुरः ॥ छादयामासचक्रैश्चमुण्डःक्षिप्तैःसहस्रशः ॥
१७ ॥ तानिचक्राण्यनेकानिविशमानानितन्मुखम् ॥ बभुर्यथार्कबिम्बानिसुबहूनिघनोद
रम् ॥ १८ ॥ ततोजहासातिरुषाभीमम्भैरवनादिनी ॥ कालीकरालवक्त्रान्तर्दुर्दर्शदशनो

५१
॥ राम ॥
॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वला॥१९॥उत्थायचमहासिंहन्देवीचण्डमधावत॥गृहीत्वाचास्यकेशेषुशिरस्तेना
सिनाछिनत्॥२०॥अथमुण्डोभ्यधावत्तांदृष्ट्वाचण्डन्निपातितम्॥तमप्यपातय
द्भूमौसाखड्गाभिहतंरुषा॥२१॥हतशेषन्ततःसैन्यंदृष्ट्वाचण्डन्निपातितम्॥
मुण्डंचसुमहावीर्यंदिशोभेजेभयातुरम्॥२२॥शिरश्चण्डस्यकालीचगृहीत्वा
मुण्डमेवच॥प्राहप्रचण्डाट्टहासमिश्रमभ्येत्यचण्डिकाम्॥२३॥मयातवात्रो
पहृतौचण्डमुण्डौमहापशू॥युद्धयज्ञेस्वयंशुम्भंनिशुम्भंचहनिष्यसि॥२४॥
ऋषिरुवाच॥२५॥तावानीतौततोदृष्ट्वाचण्डमुण्डौमहासुरौ॥उवाचकाली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥
॥ ६० ॥

ङ्कल्याणी ललितं चण्डिका वचः ॥ २६ ॥ यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता । चामुण्डेति
ततो लोके ख्याता देवि भविष्यसि ॥ २७ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवी
महात्म्ये चण्डमुण्डवधः ॥ ७ ॥ उ ॥ २ ॥ श्लो ॥ २५ ॥ अ ॥ ❀ ॥ श्री अथ ध्यानम् ॥ नागाधी
श्वरविष्टराम्फणिफणोत्तंसोरुरत्नावलीभास्वद्देहलताम्दिवाकरनिभान्नेत्रत्र
योद्भासिताम् ॥ मालाकुम्भकपालनीरजकराञ्चन्द्रार्द्धमौलीम्परांसर्वज्ञेश्वरभैरवा
ङ्कनिलयाम्पद्मावतीञ्चिन्तये ॥ ८ ॥ ऋषिरुवाच ॥ १ ॥ चण्डे च निहते दैत्ये मुण्डे च वि
निपातिते । बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ २ ॥ ततः कोपपराधीनचेताः शुम्भ

॥ राम ॥
॥ ६० ॥

60

CC-0. In Public Domain. Digitization by eGangotri

प्रतापवान्॥उद्योगंसर्वसैन्यानान्दैत्यानामादिदेशह॥३॥अद्यसर्वबलैर्दैत्याःषडशी
तिरुदायुधाः॥कंबूनांचतुरशीतिर्निर्यान्तुस्वबलैर्वृताः॥४॥कोटिवीर्याणिपंचाश
दसुराणांकुलानिवै॥शतंकुलानिधौम्राणांनिर्गच्छन्तुममाज्ञया॥५॥कालकादौ
र्हृदामौर्याःकालकेयास्तथासुराः॥युद्धायसज्जानिर्यान्तुआज्ञयात्वरितामम॥६॥
इत्याज्ञाप्यासुरपतिःशुम्भोभैरवशासनः॥निर्जगाममहासैन्यसहस्रैर्बहुभिर्वृतः॥७॥आ
यान्तंचण्डिकादृष्ट्वातत्सैन्यमतिभीषणम्॥ज्यास्वनैःपूरयामासधरणीगगनान्तर
म्॥८॥ततःसिंहोमहानादमतीवकृतवान्नृप॥घण्टास्वनेनतान्नादानम्बिकाचोपबृंह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥
॥ ६१ ॥

यत्र ॥ ९ ॥ धनुर्ज्यासिंहघण्टानान्नादापूरितदिङ्मुखा ॥ निनादैर्भीषणैः काली जिग्ये विस्ता
रितानना ॥ १० ॥ तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥ देवी सिंहस्तथा काली सरोषैः
परिवारिता ॥ ११ ॥ एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ॥ भवायामरसिंहानामतिवी
र्यबलान्विताः ॥ १२ ॥ ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ॥ शरीरेभ्यो विनिष्क्रम्य तद्रू
पैश्चण्डिकां ययुः ॥ १३ ॥ यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ॥ तद्वदेव हि तच्छक्तिरसु
रान्योद्धुमाययौ ॥ १४ ॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥ आयाता ब्रह्मणः श
क्तिर्ब्रह्माणी साभिधीयते ॥ १५ ॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥ महाहिवलयाप्रा

61
॥ रामो ॥
॥ ६१ ॥

प्ताचन्द्ररेखाविभूषणा ॥१६॥ कौमारीशक्तिहस्ताचमयूरवरवाहना ॥ योद्धुमभ्याययौ
दैत्यानंबिकागुहरूपिणी ॥१७॥ तथैववैष्णवीशक्तिर्गरुडोपरिसंस्थिता ॥ शंखचक्रगदा
शार्ङ्गखड्गहस्ताभ्युपाययौ ॥१८॥ यज्ञवाराहमतुलंरूपंयाबिभ्रतोहरेः ॥ शक्तिःसाप्याय
यौतत्रवाराहींबिभ्रतीतनुम् ॥१९॥ नारसिंहीनृसिंहस्यबिभ्रतीसदृशंवपुः ॥ प्राप्तात
त्रसटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥२०॥ वज्रहस्तातथैवैन्द्रीगजराजोपरिस्थिता ॥ प्राप्तास
हस्रनयनायथाशक्रस्तथैवसा ॥२१॥ ततःपरिवृतस्ताभिरीशानोदेवशक्तिभिः ॥ ह
न्यन्तामसुराःशीघ्रंममप्रीत्याहचण्डिकाम् ॥२२॥ ततोदेवीशरीरात्तुविनिष्क्रान्तातिभी

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ६२ ॥

षणा॥ चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी॥२३ साचाह धूम्रजटिलमीशानम
पराजिता॥ दूतत्वंगच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः॥२४॥ ब्रूहि शुम्भंनिशुम्भंचदा
नवावतिगर्वितौ॥ येचान्येदानवास्तत्रयुद्धाय समुपस्थिताः॥२५॥ त्रैलोक्यमिन्द्रोल
भतांदेवाः सन्तु हविर्भुजः॥ यूयंप्रयात पातालंयदि जीवितुमिच्छथ॥ २६॥ बलावले
पादथचेद्भवन्तो युद्धकांक्षिणः॥ तदागच्छत तृप्यन्तु मच्छिवाः पिशितेनवः॥ २७॥ य
तोनियुक्तो दौत्येन तया देव्याशिवः स्वयम्॥ शिवदूतीति लोकेस्मिंस्ततः साख्यातिमा
गता॥ २८॥ तेपिश्रुत्वावचो देव्याः सर्वाख्यातं महासुराः॥ अमर्षापूरिता जग्मुर्यतः का

॥ राम ॥
॥ ६२ ॥
62

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायनी स्थिता ॥ २९ ॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टिहस्तिभिः ॥ ववर्षुरुद्धतामर्षास्तां देवीमम
रारयः ॥ ३० ॥ सा च तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् ॥ चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषु
भिः ॥ ३१ ॥ तस्याग्रतस्तथा काली शूलपातविदारितान् ॥ खट्वांगपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥ ३२ ॥
कमण्डलुजलाक्षेपहतवीर्यान्हतौजसः ॥ ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावति ॥ ३३ ॥ माहे
श्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥ दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥ ३४ ॥ ऐन्द्रीकुलि
शपातेन शतशो दैत्यदानवाः ॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ ३५ ॥ तुण्डप्रहारविध्वस्ता
दंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥ ३६ ॥ नखैर्विदारितांश्चान्यान्भक्षयंती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥ ॥ ६३ ॥

मसुरान् ।नारसिंहिहि च चाराजौ नादापूर्णदिगम्बरा ॥ ३७ ॥ चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।पेतुः
पृथिव्यांपतितांस्तांश्चखादाथसातदा ॥ ३८ ॥ इतिमातृगणंक्रुद्धंमर्दयन्तंमहासुरान् । दृष्ट्वाभ्युपायैर्वि
विधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥ पलायनपरान्दृष्ट्वादैत्यान्मातृगणार्दितान् ।योद्धुमभ्याययौक्रुद्धो
रक्तबीजोमहासुरः ॥ ४० ॥ रक्तबिन्दुर्यदाभूमौपतत्यस्यशरीरतः ।समुत्पततिमेदिन्यांस्तत्प्रमाणस्त
दासुरः ॥ ४१ ॥ युयुधेसगदापाणिरिन्द्रशक्त्यामहासुरः ।ततश्चैन्द्रीस्ववज्रेणरक्तबीजमताडयत्
॥ ४२ ॥ कुलिशेनाहतस्याशुबहुसुस्रावशोणितम् ।समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्पराक्रमाः ॥ राम ॥
॥ ४३ ॥ यावन्तःपतितास्तस्यशरीराद्रक्तबिन्दवः ।तावन्तःपुरुषाजातास्तद्वीर्यबलविक्रमाः ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४४॥ तेचापियुयुधुस्तत्रपुरुषारक्तसम्भवाः। सममम्मातृभिरत्युग्रशस्त्रपातातिभीषणम्॥४५॥पु
नश्चवज्रपातेनक्षतमस्यशिरोयदा। ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः॥४६॥वैष्णवीसमरेचै
नंचक्रेणाभिजघानह। गदयाताडयामासऐन्द्रीतमसुरेश्वरम्॥४७॥वैष्णवीचक्रभिन्नस्यरुधि
रस्रावसम्भवैः। सहस्रशोजगद्व्याप्तंतत्प्रमाणैर्महासुरैः॥४८॥शक्त्याजघानकौमारीवाराहीचत
थासिना। माहेश्वरीत्रिशूलेनरक्तवीजंमहासुरम्॥४९॥स चापिगदयादैत्यःसर्वाएवाहनत्पृ
थक्। मातॄःकोपसमाविष्टोरक्तवीजोमहासुरः॥५०॥तस्याहतस्यबहुधाशक्तिशूलादिभिर्भुवि
पपातयोवैरक्तौघस्तेनासञ्छतशोसुराः॥५१॥तैश्चासुरासृक्सम्भूतैरसुरैःसकलंजगत्। व्याप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥ मासीत्ततोदेवाभयमाजग्मुरुत्तमम् ॥५२॥ तान्विषण्णान्सुरान्दृष्ट्वाचण्डिकाप्राहसत्वरा। उवाचकालीं
॥६४॥ चामुण्डेविस्तरंवदनंकुरु ॥५३॥ मच्छस्त्रपातसम्भूतान्रक्तबिन्दून्महासुरान्। रक्तबिंदोःप्रतीच्छत्व
म्वक्त्रेणानेनवेगिता ॥५४॥ भक्षयन्तीचररणेतदुत्पन्नान्महासुरान्। एवमेषक्षयंदैत्यःक्षीण
रक्तोगमिष्यति ॥५५॥ भक्ष्यमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे। इत्युक्त्वातांततोदेवीशूले
नाभिजघानतम् ॥५६॥ मुखेनकालीजगृहेरक्तबीजस्यशोणितम्। ततोसावाजघानाथगद
यातत्रचण्डिकाम् ॥५७॥ नचास्यावेदनांचक्रेगदापातोल्पिकामपि। तस्याहतस्यदेहात्तुब ॥ राम ॥
हुसुस्रावशोणितम् ॥५८॥ यतस्ततस्तद्वक्त्रेणचामुण्डासम्प्रतीच्छति। मुखेसमुद्गतायेस्या ॥६४॥

64

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्तपातान्महासुराः ॥५९॥ तांश्चखादाथचामुण्डापपौतस्यचशोणितम् । देवीशूलेनवज्रेणवाणैर
सिभिर्ऋष्टिभि ॥६०॥ जघानरक्तवीजन्तंचामुण्डापीतशोणितम् । सपपातमहीपृष्ठेशस्त्रसंघ
समाहतः ॥६१॥ नीरक्तश्चमहीपालरक्तवीजोमहासुरः । ततस्तेहर्षमतुलमवापुस्त्रिदशानृप ।
॥६२॥ तेषाम्मातृगणोजातोननर्तासृङ्मदोद्धतः ॥६३॥ इतिमार्कण्डेयपुराणेसावर्णिके
मन्वन्तरेदेवीमहात्म्येरक्तवीजवधः ॥ ८ उ ॥ १ अ ॥ १ श्लो ॥ ६१ ॥ अरुणाकरुणा ॥ श्री
अथध्यानम् । अरुणांकरुणातरंगिताक्षीन्धृतपाशांकुशपुष्पचापहस्ताम् । अणिमा
दिभिरावृताम्मयूखैरहमित्येवविभावयेभवानीम् ॥ १ ॥ राजोवाच ॥ १ ॥ विचित्रमिदमाख्यातं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥
॥ ६५ ॥

भगवन्भवतामम ॥ देव्याश्चरितमहात्म्यं रक्तवीजवधाश्रितम् ॥ २ ॥ भूयश्चेच्छाम्यहं श्रोतुं रक्तवीजेनि-
पातिते ॥ चकारशुंभो यत्कर्म निशुम्भश्चातिकोपनः ॥ ३ ॥ ऋषिरुवाच ॥ ४ ॥ चकार कोपमतुलं रक्तवी
जेनिपातिते ॥ शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ५ ॥ हन्यमानं महासैन्यं विलोक्यामर्षमुद्व
हन् ॥ अभ्यधावन्निशुम्भोथ मुख्ययासुरसेनया ॥ ६ ॥ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासु
राः ॥ सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥ ७ ॥ आजगाम महावीर्य्यः शुम्भोपि स्वबलैर्वृ
तः ॥ निहन्तुं चण्डिकां कोपात्कृत्वा युद्धन्तु मातृभिः ॥ ८ ॥ ततो युद्धमतीवासीद्देव्याः शुम्भनिशु
म्भयोः ॥ शरवर्षमतीवोग्रं मेघयोरिव वर्षतो ॥ ९ ॥ चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिकास्वश्च

65
॥ राम ॥
॥ ६५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोत्करैः॥ ताडयामासचाङ्गेषुशुम्भस्तौघोरसुरेश्वरी ॥१०॥ निशुम्भोनिशितंखड्गंचर्मचादायसुप्रभ
म् ॥ अताडयन्मूर्द्धिसिंहन्देव्यावाहनमुत्तमम् ॥११॥ ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमम्
॥ निशुम्भस्याशुचिच्छेदचर्मचाप्यष्टचन्द्रकम् ॥१२॥ छिन्नेचर्मणिखड्गेचशक्तिंचिक्षेपसो
सुरः ॥ तामप्यस्यद्विधाचक्रेचक्रेणाभिमुखागताम् ॥१३॥ कोपाध्मातोनिशुम्भोथशूलंजग्रा
हदानवः ॥ आयान्तम्मुष्टिपातेनदेवीतच्चाप्यचूर्णयत् ॥१४॥ आविद्ध्याथगदांसोपिचिक्षेपच
ण्डिकांप्रति ॥ सापिदेव्यास्त्रिशूलेनभिन्नाभस्मत्वमागता ॥१५॥ ततःपरशुहस्तन्तमायान्तन्दे
त्यपुङ्गवम् ॥ आहत्यदेवीबाणौघैरपातयतभूतले ॥१६॥ तस्मिन्निपतितेभूमौनिशुम्भेभीम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ वं ॥
॥ ६६ ॥

विक्रमे ॥ आगच्छतीवसंक्रुद्धः सययौहन्तुमंबिकाम् ॥ १७ ॥ सरथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ॥ भुजैर
ष्टाभिरतुलैर्व्याप्याशेषम्बभौनभः ॥ १८ ॥ तमायान्तंसमालोक्यदेवीशंखमवादयत् ॥ ज्याशब्दञ्चा
पिधनुषश्चकारातीवदुस्सहम् ॥ १९ ॥ पूरयामासककुभोनिजघण्टास्वनेनच ॥ समस्तदैत्यसैन्या
नान्तेजोवधविधायिना ॥ २० ॥ ततःसिंहोमहानादैस्त्याजितेभमहामदैः ॥ पूरयामसगगनंगान्तथो
पदिशोदश ॥ २१ ॥ ततःकालीसमुत्पत्यगगनंक्ष्मामताडयत् ॥ कराभ्यान्तन्निनादेनप्राक्स्व
नास्तेतिरोहिताः ॥ २२ ॥ अट्टट्टहासमशिवंशिवदूतीचकारह ॥ तैःशब्दैरसुरास्त्रेसुः शुंभःकोपं
परंययौः ॥ २३ ॥ दुरात्मंस्तिष्ठतिष्ठेतिव्याजहारांबिकायदा ॥ तदाजयेत्यभिहितन्देवैराकाशसं

66

॥ राम ॥
॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थितैः ॥२४॥ शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा । आयान्ती वह्निकूटाभा सा निरस्ता
महोल्कया ॥२५॥ सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् । निर्घातनिःस्वनो घोरो जितवानवनी
पते ॥२६॥ शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् । चिच्छेद स्वशरैरुग्रैः शतशोथ सहस्र
शः ॥२७॥ ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् । स तदाभिहतो भूमौ मूर्छितो निपपात ह ॥२८
ततो निशुम्भः संप्राप्य चेतनामात्तकार्मुकः ॥ आजघान शरैर्देवीं कालीं केसरिणन्तथा
॥२९॥ पुनश्च कृत्वा बाहूनामयुतन्दनुजेश्वरः ॥ चक्रायुधेन दितिजश्छादयामास चण्
डिकाम् ॥ अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥३२॥ तस्यापतत एवाशु गदां चिच्छेद

CC-0. In Public Domain. Digitization by eGangotri

॥चं॥ चण्डिका॥खड्गेनशितधारेणसचशूलंसमाददे॥३३॥शूलहस्तंसमायान्तंनिशुम्भममरार्दनम्

॥६७॥ हृदिविव्याधशूलेनवेगाविद्धेनचण्डिका॥३४॥भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः॥महा

बलोमहावीर्यस्तिष्ठेतिपुरुषोवदन्॥३५॥तस्यनिष्क्रामतोदेवीप्रहस्यस्वनवत्ततः॥शिरश्चि

च्छेदखड्गेनततोसावपतद्भुवि॥३६॥ततःसिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान्॥असुरां

स्तांस्तथाकालीशिवदूतीतथापरान्॥३७॥कौमारीशक्तिनिर्भिन्नाःकेचिन्नेशुर्महासुराः ६८

॥ब्रह्माणीमंत्रपूतेनतोयेनान्येनिराकृताः॥३८॥माहेश्वरीत्रिशूलेनभिन्नाःपेतुस्तथापरे॥वा ॥राम॥

राहीतुण्डघातेनकेचिच्चूर्णीकृताभुवि॥३९॥खण्डखण्डंचचक्रेणवैष्णव्यादानवाःकृताः॥व ॥६७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्रेणचैन्द्रीहस्ताग्रविमुक्तेनतथापरे ॥ ४० ॥ केचिद्विनेशुरसुराः केचिन्नष्टामहाहवात् ॥ भक्षिताश्चाप
रेकाल्याशिवदूतिमृगाधिपैः ॥ ४ ॥ इतिमार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येनिशुंभव
धः ॥ ९ ॥ उ २ ॥ अ ॥ श्लो ॥ ३९ ॥ श्रीअथध्यानम् ॥ उत्तप्तहेमरुचिरांरविचन्द्रवह्निनेत्रांधनुःशरयु
तांकुशपानपात्रम् रम्यैर्भुजैश्चदधतींशिवशक्तिरूपांकामेश्वरींहृदिभजामिधृतेन्दुरेखाम् ॥ ऋषिरु
वाच ॥ १ ॥ निशुम्भंनिहतंदृष्ट्वाभ्रातरंप्राणसम्मितम् ॥ हन्यमानम्बलंचैवशुम्भःक्रुद्धोऽब्रवीद्वचः ॥ २ ॥ बला
वलेपदुष्टेत्वंमादुर्गेगर्वमावह ॥ अन्यासांबलमाश्रित्ययुद्ध्यसेयातिमानिनी ॥ ३ ॥ देव्युवाच ॥ ४ ॥
एकैवाहंजगत्यत्रद्वितीयाकाममापरा ॥ पश्यैतादुष्टमय्येवविशन्त्योमद्विभूतयः ॥ ५ ॥ ततःसम

॥च॥ स्तास्तादेव्योब्रह्माणीप्रमुखालयम्॥ तस्यादेव्यास्तनौजग्मुरेकैवासीत्तदाम्बिका॥ ६॥ देव्युवाच॥ ७॥
॥६८॥ अहंविभूत्याबहुभिरिहरूपैर्यदास्थिता॥ तत्संहृतंमयैकैवतिष्ठाम्याजौस्थिरोभव॥ ८॥ ऋषिरुवाच
॥ ९॥ ततःप्रववृतेयुद्धंदेव्याःशुम्भस्यचोभयोः॥ पश्यतांसर्वदेवानामसुराणांचदारुणम्॥ १०॥ शर
वर्षैःशितैःशस्त्रैस्तथास्त्रैश्चैवदारुणैः॥ ततोर्युद्धमभूद्भूयःसर्वलोकभयंकरम्॥ ११॥ दिव्यान्यस्त्राणिशतशो
मुमुचेयान्यथाम्बिका॥ बभंजतानिदैत्येन्द्रस्तत्प्रतीघातकर्तृभिः॥ १२॥ मुक्तानितेनचास्त्राणिदिव्यानिपरमे
श्वरी॥ बभंजलीलयैवोग्रहुंकारोच्चारणादिभिः॥ १३॥ ततःशरशतैर्देवीमाच्छादयतसोसुरः॥ सापितत्कुपि
तादेवीधनुश्चिच्छेदचेषुभिः॥ १४॥ छिन्नेधनुषिदैत्येन्द्रस्तथाशक्तिमथाददे॥ चिच्छेददेवीचक्रेणताम

CC-0. In Public Domain. Digitization by eGangotri

प्पस्यकरेस्थिताम् ॥ १५ ॥ ततः खड्गमुपादाय शतचंद्रं च भानुमत् ॥ अभ्यधावत्तदा देवीं दैत्यानामधिपे
श्वरः ॥ १६ ॥ तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥
१७ ॥ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः ॥ १८ ॥ चिच्छेदापत
तस्तस्य मुद्गरं निशितैः शरैः ॥ तथापि सोभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥ १९ ॥ स मुष्टिं पातयामास हृद
ये दैत्यपुङ्गवः ॥ देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥ २० ॥ तलप्रहाराभिहतो निपपात महीतले
॥ स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ २१ ॥ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥ तत्रापि सा नि
राधारा युयुधे तेन चण्डिका ॥ २२ ॥ नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ॥ चक्रतुः प्रथमं सिद्धमुनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चं
६९

विस्मयकारकम् ॥२३॥ ततोनियुद्धंसुचिरंकृत्वा तेनांबिकासह॥ उत्पात्यभ्रामयामासचिक्षेपधरणीत
ले ॥२४॥ सक्षिप्तोधरणींप्राप्यमुष्टिमुद्यम्यवेगितः॥ अभ्यधावतदुष्टात्माचण्डिकानिधनेच्छया ॥२५॥
तमायान्तंततोदेवीसर्वदैत्यजनेश्वरम्॥ जगत्यांपातयामासभित्वाशूलेनवक्षसि ॥२६॥ सगतासुःप
पातोर्व्यांदेवीशूलाग्रविक्षतः॥ चालयन्सकलांपृथ्वींसाब्धिद्वीपांसपर्वताम् ॥२७॥ ततःप्रसन्नम
खिलंहतेतस्मिन्दुरात्मनि॥ जगत्स्वास्थ्यमतीवापनिर्मलंचाभवन्नभः ॥२८॥ उत्पातमेघाःसोल्का
येप्रागासंस्तेशमंययुः॥ सरितोमार्गवाहिन्यस्तथासंस्तत्रपातिते ॥२९॥ ततोदेवगणाःसर्वेहर्षनिर्भरमा
नसाः॥ बभूवुर्निहतेतस्मिन्गन्धर्वाललितंजगुः ॥३०॥ अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः॥ व

69
राम
६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वुःपुरापास्तथावाताःसुप्रभोभूद्दिवाकरः॥ ३१॥ जज्वलुश्चाग्नयःशांताःशान्तदिग्जनितस्वनां॥ ३२॥
इतिमार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येशुम्भवधः॥ १०॥ उ॥ ४॥ अ॥ ३७॥ श्रीअथ
ध्यानम्॥ उद्यद्दिन[illegible]द्युतिमिन्दुकिरीटांतुंगकु[illegible]चांनयनत्रययुक्ताम्॥ स्मेरमुखींवरदांकुशपा
शाभीतिकरांप्रभजेभुवनेशीम्॥ ११॥ ऋषिरुवाच॥ १॥ देव्याहतेतत्रमहासुरेन्द्रेसेन्द्राःसुरावह्नि
पुरोगमास्ताम्॥ कात्यायनींतुष्टुवुरिष्टलंभाद्विकाशिवक्त्रास्तुविकाशिताशाः॥ २॥ देविप्रपन्ना
र्त्तिहरेप्रसीदप्रसीदमातर्जगतोखिलस्य॥ प्रसीदविश्वेश्वरिपाहिविश्वंत्वमीश्वरीदेवीचरा
चरस्य॥ ३॥ आधारभूताजगतस्त्वमेकामहीस्वरूपेणयतःस्थितासि॥ अपांस्वरूपस्थितयात्वयैत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वं
७०

दाप्यायते कृत्स्नमलंघ्यवीर्ये ॥ ४ ॥ त्वं वैष्णवी शक्तिरनन्तवीर्य्या विश्वस्य बीजम्परमासि माया ॥ स
म्मोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥ विद्याः समस्तास्तव देवि भेदाः स्त्रियः सम
स्ताः सकला जगत्सु ॥ त्वयैकया पूरितमंवयैतत्का ते स्तुतिः स्तव्यपरापरोक्तिः ॥ ६ ॥ सर्वभूता यदा दे
वि स्वर्गमुक्तिप्रदायिनि ॥ त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ ७ ॥ सर्वस्य बुद्धिरूपेण जनस्य
हृदि संस्थिते ॥ स्वर्गापवर्गदे देवि नारायणि नमोस्तुते ॥ ८ ॥ कलाकाष्ठादिरूपेण परिणामप्रदा
यिनि ॥ विश्वस्योपरतौ शक्ते नारायणि नमोस्तुते ॥ ९ ॥ सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ॥ श
रण्ये त्र्यंबके गौरि नारायणि नमोस्तुते ॥ १० ॥ सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ॥ गु॰

राम
७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णाश्रये गुणमये नारायणि नमोस्तुते ॥ ११ ॥ शरणागतदीनार्त्तपरित्राणपरायणे ॥ सर्वस्या
र्त्तिहरे देवि नारायणि नमोस्तुते ॥ १२ ॥ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥ कौशाम्भः
क्षरिके देवि नारायणि नमोस्तुते ॥ १३ ॥ त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ॥ माहेश्वरीस्वरू
पेण नारायणि नमोस्तुते ॥ १४ ॥ मयूरकुक्कुटवृते महाशक्तिधरेनघे ॥ कौमारीरूपसंस्थाने ना
रायणि नमोस्तुते ॥ १५ ॥ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥ प्रसीद वैष्णवीरूपे नारायणि न
मोस्तुते ॥ १६ ॥ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ॥ वराहरूपिणि शिवे नारायणि नमोस्तुते ॥ १७ ॥
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणसहिते नारायणि नमोस्तुते ॥ १८ ॥ किरीटि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ७१ ॥

निमहावज्रेसहस्रनयनोज्वले। वृत्रप्राणहरेचैन्द्रिनारायणिनमोस्तुते ॥१९॥ शिवदूतिस्वरूपेणहतदैत्य
महाबले। घोररूपेमहारावेनारायणिनमोस्तुते ॥२०॥ दंष्ट्राकरालवदनेशिरोमालाविभूषणे। चामुण्डेमु
ण्डमथनेनारायणिनमोस्तुते ॥२१॥ लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे ॥ महारात्रिमहाविद्ये
नारायणिनमोस्तुते ॥२२॥ मेधेसरस्वतिवरेभूतिबाभ्रवितामसि ॥ नियतेत्वंप्रसीदेशेनारायणिनमो
स्तुते ॥२३॥ सर्वस्वरूपेसर्वेशेसर्वशक्तिसमन्विते। भयेभ्यस्त्राहिनोदेविदुर्गेदेविनमोस्तुते ॥२४॥ एतत्तेव
दनंसौम्यंलोचनत्रयभूषितम् ॥ पातुनःसर्वभूतेभ्यःकात्यायनिनमोस्तुते ॥२५॥ ज्वालाकरालमत्युग्र
मशेषासुरसूदनम् त्रिशूलंपातुनोभीतेर्भद्रकालिनमोस्तुते ॥२६॥ हिनस्तिदैत्यतेजांसिस्वनेनापू

॥ राम ॥
॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्य्ययाजगत् । साघण्टापातुनोदेविपापेभ्योनःसुतानिव ॥ २७ ॥ असुरासृग्वसापंकचर्च्चितस्तेकरोज्व
लः ॥ शुभायखड्गोभवतुचण्डिकेत्वांनतावयम् ॥ २८ ॥ रोगानशेषानपहंसितुष्टारुष्टातुकामान्स
कलानभीष्टान् । त्वामाश्रितानान्नविपन्नराणान्त्वामाश्रिताह्याश्रयतांप्रयान्ति ॥ २९ ॥ एतत्कृतं
यत्कदनन्त्वयाद्यधर्मद्विषांदेविमहासुराणाम् । रूपैरनेकैर्बहुधात्ममूर्त्तिंकृत्वाम्बिकेतत्प्रकरोतिका
न्या ॥ ३० ॥ विद्यासुशास्त्रेषुविवेकदीपेष्वाद्येषुवाक्येषुचकात्वदन्या । ममत्वगर्त्तेतिमहान्धकारेविभ्राम
यत्येतदतीवविश्वम् ॥ ३१ ॥ रक्षांसियत्रोग्रविषाश्चनागायत्रारयोदस्युबलानियत्र । दावानलोयत्रतथा
ब्धिमध्येतत्रास्थितात्वम्परिपासिविश्वम् ॥ ३२ ॥ विश्वेशवंद्याभवतीभवन्तिविश्वाश्रयायेत्वयिभक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥ नशाः ॥ ३३ ॥ देविप्रसीदपरिपालयनोरिभितेर्नित्यंयथासुरवधादधुनैवसद्यः ॥ पापानिसर्वजगतांप्रशमंनया
॥ ७२ ॥ शुउत्पातपाकजनितांश्चमहोपसर्गान् ॥ ३४ ॥ प्रणतानांप्रसीदत्वन्देविविश्वार्तिहारिणि ॥ त्रैलोक्य
वासिनामिड्येलोकानाम्वरदाभव ॥ ३५ ॥ देव्युवाच ॥ वरदाहंसुरगणावरंयन्मनसेच्छथ ॥ तंवृणुध्वं
प्रयच्छामिजगतामुपकारकम् ॥ ३७ ॥ देवाउचुः ॥ ३८ ॥ सर्वाबाधाप्रशामनंत्रैलोक्यस्याखिलेश्वरि ॥ एवमे
वत्वयाकार्य्यमस्मद्वैरिविनाशनम् ॥ ३९ ॥ देव्युवाच ॥ ४० ॥ वैवस्वतेन्तरेप्राप्तेअस्टाविंशतिमेयुगे ॥ शुम्भो 12
निशुम्भश्चैवान्यावुत्पत्स्येतेमहासुरौ ॥ ४१ ॥ नन्दगोपगृहेजातायशोदागर्भसम्भवा ॥ ततस्तौनाशयिष्यामि ॥ राम ॥
विंध्याचलनिवासिनी ॥ ४२ ॥ पुनरप्यतिरौद्रेणरूपेणपृथिवीतले ॥ अवतीर्यहनिष्यामिवैप्रचित्तांस्तुदानवा ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्॥ ४३॥ भक्षयन्त्याश्च तानुग्रान्वैप्रचित्तान्महासुरान्॥ रक्तदन्ता भविष्यन्ति दाडिमीकुसुमोपमा॥ ४४
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः॥ स्तुवंतो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्॥ ४५॥ भूयश्च श
तवार्षिक्यामनावृष्ट्यामनम्भसि॥ मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा॥ ४६॥ ततः शतेन नेत्राणा
न्निरीक्षिष्यामि यन्मुनीन्॥ कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः॥ ४७॥ ततोहमखिलं लोकमात्म
देहसमुद्भवैः॥ भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः॥ ४८॥ शाकम्भरीति विख्यातिं तदा यास्या
म्यहं भुवि॥ तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्॥ ४९॥ दुर्गादेवीति विख्यातं तन्मे नाम भविष्य
ति॥ पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले॥ ५०॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात्

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥ तदामाम्मुनयः सर्वेस्तोष्यन्त्यानम्रमूर्त्तयः ॥ ५१ ॥ भीमादेवीतिविख्यातन्तन्मेनामभविष्यति ॥ यदारुणाख्य
॥ ७३ ॥ स्त्रैलोक्येमहाबाधांकरिष्यति ॥ ५२ ॥ तदाहम्भ्रामरंरूपंकृत्वासंख्येयषट्पदम् ॥ त्रैलोक्यस्यहितार्थाय
वधिष्यामिमहासुरम् ॥ ५३ ॥ भ्रामरीतिचमांलोकास्तदास्तोष्यन्तिसर्वतः ॥ इत्थंयदायदाबाधादानवोत्था
भविष्यति ॥ ५४ तदातदावतीर्याहंकरिष्याम्यरिसंक्षयम् ॥ ५५ ॥ इतिमार्कण्डेयपुराणेसावर्णिकेमन्व
न्तरेदेवीमाहात्म्येनारायणस्तुतिः ॥ ११ ॥ उ ॥ ४ ॥ अ ॥ १ ॥ श्लो ॥ ५० ॥ श्री ॥ अथध्यानम् ॥ विद्युद्दामसम 73
प्रभाम्मृगपतिस्कन्धस्थितांभीषणांकन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रगदा
सिखेटविशिखांश्चापंकरैस्तर्जनींबिभ्राणामनलात्मिकांशशिधरांदुर्गांत्रिनेत्रांस्मरेत् ॥ १२ ॥ देव्युवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥१॥ एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः। तस्याहं सकलां बाधां शमयिष्याम्यसंशयम्॥२॥ मधुकै
टभनाशञ्च महिषासुरघातनम्॥ कीर्त्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः॥३॥ अष्टम्यां च चतुर्दश्यां न
वम्यां चैकचेतसः॥ श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम्॥४॥ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था
न चापदः। भविष्यन्ति न दारिद्र्यं न चैवेष्टवियोजनम्॥५॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः। न शा
स्त्रानलतोयौघात्कदाचित्सम्भविष्यति॥६॥ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः। श्रोतव्यं च सदा भ
क्त्या परं स्वस्त्ययनं हि तत्॥७॥ उपसर्गानशेषांस्तु महामारीसमुद्भवान्। तथा त्रिविधमुत्पातं माहात्म्यं शम
येन्मम॥८॥ यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम॥ सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम्॥९॥

CC-0. In Public Domain. Digitization by eGangotri

चं
७४

वलिप्रदानेपूजायामग्निकार्य्येमहोत्सवे। सर्वंममैतच्चरितमुच्चार्यंश्राव्यमेवच ॥१०॥ जानताजान
तावापिवलिपूजान्तथाकृताम्। प्रतीक्षिष्याम्यहंप्रीत्यावन्हिहोमंतथाकृतम् ॥११॥ शरत्कालेम
हापूजाक्रियतेयाचवार्षिकी। तस्याम्ममैतन्माहात्म्यंश्रुत्वाभक्तिसमन्वितः ॥१२॥ सर्वाबाधाविनिर्मुक्तो
धनधान्यसुतान्वितः। मनुष्योमत्प्रसादेनभविष्यतिनसंशयः ॥१३॥ श्रुत्वाममैतन्माहात्म्यन्तथाचोत्
पत्तयःशुभाः। पराक्रमञ्चयुद्धेषुजायतेनिर्भयःपुमान् ॥१४॥ रिपवःसंक्षयंयान्तिकल्याणंचोपप
द्यते। नन्दतेचकुलंपुंसाम्माहात्म्यम्ममशृण्वताम् ॥१५॥ शान्तिकर्मणिसर्वत्रतथादुःस्वप्नदर्शने। ग्रह ॥ राम ॥
पीडासुचोग्रासुमाहात्म्यंशृणुयान्मम ॥१६॥ उपसर्गाःशमंयान्तिग्रहपीडाश्चदारुणाः। दुःस्वप्नञ्चनृ ॥ ७४ ॥

74

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिर्दृष्टंसुस्वप्नमुपजायते॥ १७॥ वालग्रहाभिभूतानांवालानांशान्तिकारकम्॥ संघातभेदेचनृणाम्मै
त्रीकरणमुत्तमम्॥ १८॥ दुर्वृत्तानामशेषाणांवलहानिकरम्परम्॥ रक्षोभूतपिशाचानांपठनादे
वनाशनम्॥ १९॥ सर्वंममैतन्माहात्म्यम्ममसन्निधिकारकम्॥ पशुपुष्पार्घधूपैश्चगन्धदीपैस्त
थोत्तमैः॥ २०॥ विप्राणाम्भोजनैर्होमैःप्राक्षणीयैरहर्निशम्॥ अन्यैश्चविविधैर्भोगैःप्रदानैर्वत्सरे
णया॥ २१॥ प्रीतिर्मेक्रियतेसास्मिन्सकृत्सुचरितेश्रुते॥ श्रुतंहरतिपापानितथारोग्यम्प्रयच्छति॥
२२॥ रक्षाङ्करोतिभूतेभ्योजन्मनांकीर्तनम्मम॥ युद्धेषुचरितंयन्मेदुष्टदैत्यनिवर्हणम्॥ २३॥ तस्मिञ्छ्रुतेवै
रिकृतम्भयम्पुंसान्नजायते॥ युष्माभिःस्तुतयोयाश्चयाश्चब्रह्मर्षिभिःकृताः॥ २४॥ ब्रह्मणाचकृतास्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वं
७५

सुप्रयच्छति शुभाम्मतिम्॥ अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः॥ २५॥ दस्युभिर्वा वृतः शून्ये गृही
तो वापि शत्रुभिः॥ सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः॥ २६॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो वन्धगतो
पि वा। आघूर्णितो वा वातेन स्थितः पोते महार्णवे॥ २७॥ पतत्सु चापि शस्त्रेषु सङ्ग्रामे भृशदारुणे॥ स
र्वाबाधासु घोरासु वेदनाभ्यर्दितोपि वा॥ २८॥ स्मरन्ममैतच्चरितन्नरो मुच्येत संकटात्॥ मम प्रभावात्सिंह
द्या दस्यवो वैरिणस्तथा॥ २९॥ दूरादेव पलायन्ते स्मरतश्चरितम्मम॥ ३०॥ ऋषिरुवाच॥ ३१॥ इत्युक्त्वा
सा भगवती चण्डिका चण्डविक्रमा॥ ३२॥ पश्यतामेव देवानान्तत्रैवान्तरधीयत॥ तेपि देवा निरातंकाः राम
स्वाधिकारान्यथापुरा॥ ३३॥ यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः॥ दैत्याश्च देव्या निहते शुम्भे देव ७५

75

रिपोर्युधि ॥ ३४ ॥ जगाद्विध्वंसिनि तस्मिन्महोग्रेतुलविक्रमे । निशुम्भे च महावीर्ये शेषाः पातालमाय
युः ॥ ३५ ॥ एवम्भगवती देवी सा नित्यापि पुनः पुनः । सम्भूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥ तयै
तन्मोह्यते विश्वं सैव विश्वं प्रसूयते । सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३७ ॥ व्याप्तं तयैतत्
सकलं ब्रह्माण्डं मनुजेश्वर । महाकाल्या महाकाले महामारीस्वरूपया ॥ ३८ ॥ सैव काले महामारी सैव स
ष्टिर्भवत्यजा । स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९ ॥ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे
सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ॥ ४० ॥ स्तुता सम्पूजिता पुष्पैर्धूपगन्धादिभिस्तथा । ददाति
वित्तं पुत्रांश्च मतिं धर्मे तथा शुभाम् ॥ ४१ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये भ

CC-0. In Public Domain. Digitization by eGangotri

गवतिवाक्यम् शुम्भनिशुम्भवधः॥ १२॥ उ॥ २॥ अ॥ २॥ श्लो॥ ३७॥ देवीप्रसादवाक्यम्॥ अथध्यानं
वालार्कमण्डलाभासाञ्चतुर्वाहुन्त्रिलोचनाम्॥ पाशांकुशवराश्चापन्धारयन्तींशिवाम्भजे॥ १३॥ ऋ
षिरुवाच॥ १॥ एतत्तेकथितंभूपदेवीमाहात्म्यमुत्तमम्॥ एवम्प्रभावासादेवीययेदन्धार्य्यतेजगत्॥
२॥ विद्यातथैवक्रियतेभगवद्विष्णुमायया॥ तयात्वमेषवैश्यश्चतथैवान्येविवेकिनः॥ ३॥ मोह्यन्ते
मोहिताश्चैवमोहमेष्यन्तिचापरे॥ तामुपैहिमहाराजशरणम्परमेश्वरीम्॥ ४॥ आराधितासैव
नृणाम्भोगस्वर्गापवर्गदा॥ ५॥ मार्कण्डेयउवाच॥ ६॥ इतितस्यवचःश्रुत्वासुरथःसनराधिपः॥
॥ ७॥ प्रणिपत्यमहाभागतमृषिंशंशितव्रतम्॥ निर्विण्णोतिममत्वेनराज्यापहरणेनच॥ ८॥ जगा

॥ चं ॥ ७६ ॥

७८

॥ राम ॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ न्युलिने

ममघस्तपसे स च वैश्यो महामुने । संदर्शनार्थमंबाया नदीपुलिनसंस्थितः ॥९॥ स च वैश्यस्तपस्तेपे देवीसू
क्तम्परं जपन् । तौ तस्मिं देव्याः कृत्वा मूर्त्तिं महीमयीम् ॥१०॥ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्प
णैः ॥ निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥११॥ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥ एवं
समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥१२॥ परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥१३॥ देव्युवाच ॥१४॥
यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन० मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥१५॥ मा
र्कण्डेय उवाच ॥१६॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि । अत्रैव च निजं राज्यं हतशत्रुबलं
बलात् ॥१७॥ सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः । ममेत्यहमिति प्राज्ञः संगविच्युति का

चं
७७

रकम् ॥१८॥ देव्युवाच ॥१९॥ स्वल्पैरहोभिर्नृपतेस्वंराज्यम्प्राप्स्यतेभवान् २० हत्वारिपूनस्खलितन्तव
तत्रभविष्यति ॥२१॥ मृतश्चभूयःसम्प्राप्यजन्मदेवाद्विवस्वतः २२ सावर्णिकोनाममनुर्भवान्भुविभ
विष्यति ॥२३ वैश्यवर्यत्वयायश्चवरोस्मत्तोभिवाञ्छितः ॥२४ तम्प्रयच्छामिसंसिद्ध्यैतवज्ञानंभविष्य
ति २५ मार्कण्डेयउवाच २६ इतिदत्वातयोर्देवीयथाभिलषितम्वरम् ॥ बभूवांतर्हितासद्योभक्त्याता
भ्यामभिष्टुता ॥२७॥ एवंदेव्यावरंलब्ध्वासुरथःक्षत्रियर्षभः सूर्याज्जन्मसमासाद्यसावर्णिर्भवितामनुः
२८ सावर्णिर्भवितामनुः ॥२९ इतिमार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येसुरथवैश्य
योर्वरप्रदानन्नामत्रयोदशोध्यायः ॥१३ उ ॥ ह ॥ अ १० अथवेदोक्तंसरस्वतीसूक्तं अहंरुद्रेभिर्वसु

२८
राम
७७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिश्चराम्यहमादित्यैरुतविश्वदेवैः। अहंमित्रावरुणोभाबिभर्म्यहमिंद्राग्नि अहमश्विनौभा॥१॥ अहंसोम
माहनसम्बिभर्म्यहंत्वष्टारमुतपूषणंभगम्। अहंदधामिद्रविणांहविष्मतेसुप्राव्येयजमानायसुन्वते॥२॥
अहंराष्ट्रीसङ्गमनीवसूनांचिकितुषीप्रथमायज्ञियानाम्। तांमादेवाव्यदधुःपुरुत्राभूरिस्थात्राम्भूर्या
वेशयन्तीम्॥३॥ मयासोअंनमत्तियोविपश्यतियःप्राणितियईंशृणोत्युक्तं॥ अमन्तवोमान्तउपक्षियं
तिश्रुधिश्रुतंश्रद्धिवंतेवदामि॥४॥ अहमेवस्वयमिदंवदामिजुष्टंदेवेभिरुतमानुषेभिः॥ यंकामयेतंतमु
ग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधाम्॥५॥ अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहन्तवाउ अहंजना
यसमदंकृणोम्यहंद्यावापृथिवीआविवेश॥६॥ अहम्पूर्वेपितरमस्यमूर्द्धन्ममयोनिरप्स्वन्तःसमुद्रेततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥ विति ष्ठे भुवनानि विश्वोतां मूर्द्धाम्वर्ष्मणोपस्पृशामि ॥ ७ ॥ अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा
७८ परो दिवा पर एना पृथिव्यैतावती महिना सम्बभूव ॥ ८ ॥ २ ॥ इति ऋग्वेदोक्तं सरस्वतीसूक्तं ॥ अथ रुद्रया
मलेतं चोक्तं देवीसूक्तं लिख्यते ॥ श्रीः ततो जलिं समाधाय शिवो वाचमुदाहृतः । तुष्टाव वाग्भिर्दिव्याभिर्महा
कालीम्महेश्वरः १ वेदवाणपमनुस्त्राव लोकानां हितकाम्यया २ श्रीमहेश्वर उवाच ॥ ३ ॥ शिवामनिंद्यां वि
विधप्रभावां कालीं डूलामालिनि विश्ववंद्याम् । कपालखट्वांगधरान्नृमुण्डमालाविभूषां मृगचर्मशो ४८
भाम् ३ मुण्डकमांसांचरावासनस्थाम्विभीषणांभीषयन्तीं सुरारीन् । रक्तप्रियां मांसमदावघूर्णां कालीं ॥ राम ॥
शरण्यां शरणं प्रपद्ये । ४ अघोरबीजं चक पीश्वरस्य चिंतामणिः कुब्जिककामराजम् । विद्यामविद्यां च सकाम ७८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रांजंकामंकलामालिनिमंत्रराजम्॥ वह्नेर्वधूर्मंत्रराजोयमीशोविश्वमुग्नातीश्वरि देविवंद्ये॥ मंत्रेणचा
नेन सुसूजिवांतांससिद्धयः सर्वजगन्निवासे॥ ६॥ पंचारयुग्मं वह्निकोणयुग्मंपुनश्च पंचारयुगेन क्षु
म्॥ कलाष्टकोष्टांकितभूगृहंचयंत्रेश्वरस्तवपादकुवासम्॥ ७॥ संपूज्यये त्वंत्तवविश्वमातर्निस्वापि
नःसत्सासंभवन्ति॥ येसाधकानांकुलमार्गसारिणः कुलीनवत्साः परमाःपवित्राः॥ ८॥ तेसिद्धिमृ
द्धिंवयक्तोनुगम्यांनृणांवशीकृत्य भवंति भूपाः॥ समस्तमंत्रेणविधायचांगन्यासादिकं भक्तिसुभावयुक्ताः
९॥ तेकिंकरीकृत्यसुरान्देवानीशेजगत्येकविभूतियुक्ते॥ वदामिनाम्नं नशृणोमिचान्यंध्यायामिनाम्नं
नविचिन्तयामि॥ १०॥ स्मरामिनाम्नंनभजामिचान्यंध्यायामिनाम्नंनवितर्कयामि॥ गायामिनाम्नन्नवया

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ७९ ॥

द्दष्ट्वा त्वां विस्मयो निःशरणं प्रये ॥ ११ ॥ येषां न देवं त्वमिहासि देवि नाराधयंती ह वयेऽकुलद्रुयः ॥ अंधंतमः संप्र
विशंति ये सदा मा दर्शनं देहि ने यांदुरात्मनाम् ॥ १२ ॥ ऋषिरुवाच ॥ इति वाक्यं समाकर्ण्य परमामृतसं
मितम् ॥ प्रसन्नाभून्महाकाली प्रीयता मिष्क्ति तो वरः ॥ १३ ॥ इत्युवाच महाकाली शंभोरानन्ददायिनी
॥ प्रसंनापरमाल्हादसंयुता शिवभाषणात् ॥ १४ ॥ श्रीदेव्युवाच ॥ व्रीयतामीप्सितोभिष्टो वरो जग
ति दुर्लभः ॥ त्वत्स्याम्यद्य प्रदानं यत्त वस्तुन्माव शीकृता ॥ १५ ॥ महेश्वर उवाच ॥ कुलाचाररता देवि मति
र्मेस्तु सनातनी ॥ सफला देव देवेशि सूक्तं च सफलं तव ॥ १६ ॥ ऋषिरुवाच ॥ एवमस्त्विति चोक्त्वा हि
तिस्रो देव्यः सनातनाः ॥ अंतर्द्धिमापुः परमामेकस्मिन्ना स्थिता भवन् ॥ अथ तान्देवतान्सर्वान्प्रोवाच व

७९

॥ राम ॥
॥ ७९ ॥

CC-0. In Public Domain. Digitization by eGangotri

वनेश्वरा ॥ संतोषयंतीव श्रुङ्लोकानुग्रहतत्परा ॥ १८ ॥ देव्युवाच ॥ शृणुध्वं प्रीतिसंयुक्ता ब्रह्मविष्णुमहे
श्वराः ॥ देवीसूक्तं परं श्रेयं भविष्यति वरार्थदम् ॥ १९ ॥ देवीसूक्तं विना देवा ये च सप्तशतीं नराः ॥ श्रोष्यं
ति च पठिष्यंति तेषां शापः पदे पदे ॥ २० ॥ देवीसूक्तं विना पाठो ह्यरण्ये रोदनं यथा ॥ स्तोत्रं वा येन चानेन
पूर्णं स्तोत्रमभूदिदम् ॥ २१ ॥ देवा ऊचुः ॥ मातः सप्तशतीस्तोत्रफलश्रुतिमथोच्यताम् ॥ यां समाकर्ण्य
जीवानां विश्वासो जायते ध्रुवम् ॥ २२ ॥ ऋषिरुवाच ॥ इति वाक्यं समाकर्ण्य ब्रह्मविष्णुशिवोदितम्
फलश्रुतिमथोवाच स्तोत्रस्यास्य महामते ॥ २३ ॥ इति रुद्रयामले घटतंत्रे माहात्म्ये ब्रह्मविष्णुमहेश्वरविर
चितं महाकाली महालक्ष्मी महासरस्वतीसूक्तम् ॥ अथ मार्कण्डेयपुराणोक्तं महाकालीसूक्तं लि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥ स्मृते ॥ श्रीशिव उवाच ॥ सुन्दरी त्रिपुरा कामा कामिनी साधकप्रिया ॥ अमोघा मन्मथवचना विमोहा मोह
॥ ५० ॥ ८० नाशिनी ॥ १ ॥ अमृतेशी च कल्याणी कारुण्या कमलालया ॥ कलातीता कोमलाङ्गः करुणा विश्वना
यिका ॥ २ ॥ विघ्नहर्त्री विघ्नकर्त्री विघ्नेशी विघ्ननाशिनी ॥ कामाक्षा कामनिलया कामेशी भगमालिनी
॥ ३ ॥ त्रिखण्डा योनिमुद्रा च धेनुमुद्रा च खेचरी ॥ पाशाङ्कुशा द्राविणी च मोहिनी मदभंजिनी ॥ काष्ठाकु ४०
लेशा कल्याणी सुकल्या कल्पकारिणी ॥ ५ ॥ कोमलाङ्गी विश्वमाता युगेशी च युगन्धरी ॥ ब्रह्मविद्या
विमोहा च मोहिनी स्तंभिनी परा ॥ ६ ॥ अमोघा मन्मथकल्पा मत्ता सत्त्वविनाशिनी ॥ सत्यग्रामा स राम
त्सवहा सत्त्वरूपा जनप्रिया ॥ ७ ॥ शरीरवासिनी वामा वामदा वामदक्षिणा ॥ कपालकुण्डला कालीका ५० ८०

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लिकाकालनाशिनी॥८॥ गीतागीतप्रियागानागीतमंगल्यशालिनी॥ विश्वयोनि र्विश्वमाताविं
श्ववंद्यारूपामयी॥९॥ ऋषिरुवाच॥ इतिस्तुतस्वमानेतुश्रीशंभोःशूलधारिणः॥ महाकालीक
लातीताप्रोवाचवचनंमहत्॥१०॥ देव्युवाच॥ स्तुत्यानयानेमाहेशसन्तुष्टास्मिममानसम्॥ वरम्बर
यभद्रन्तेप्रार्थनादधिकंशिव॥११॥ शिवउवाच॥ तवामलासदादेविजायतांभक्तिरुत्तमा॥ एषए
ववरोदेविप्रार्थितोमेकृपाकुले॥१२॥ देव्युवाच॥ एवमस्त्वितिदेवेशास्मत्कृतेपावनंक्षितौ॥ दुर्लभं
भवितादेवसर्वसिद्धिविनायकम्॥१३॥ महाकालीसूक्तमृतेपठन्सप्तशतीन्नरः दारुणंनरकंग
च्छेत्सत्यन्तेव्याहृतंशिव॥१४॥ अस्यश्रवश्रूयतान्देवसप्तशत्याःफलंलभेत्॥ यस्यस्मरमात्रेणाव

CC-0. In Public Domain. Digitization by eGangotri

॥चं॥ स्सहस्पाक्षैस्त्रजेत् ॥१५॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शिवप्रोक्तम्महाकाली
॥५८॥ स्तक्तं समाप्तम् ॥ ॥श्रीः ॐ नमश्चण्डिकायै नमः ॥ राजोवाच ॥ भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥१॥ आराधयं यथा देव्याः स्वरूपं येन च द्विज ॥ विधिना ब्रूहि सक
लं यथावत्प्रणतस्य मे ॥२॥ ऋषिरुवाच ॥ शृणु राजन्प्रवक्ष्यामि चण्डिकाक्रममुत्तमम् ॥ आश्विनस्य
सितेपक्षे प्रतिपत्सु यथाक्रमम् ॥३॥ सुस्नातस्तिलतैलेन पूर्वाह्णे च नृपोत्तम ॥ प्रणपाहवावनं कृत्वा द्वि ४।
जांश्चैव तु पूजयेत् ॥४॥ ततश्च कारयेद्वेदीं सप्तधान्ययुतां नृप ॥ स्थापयेत्स्वर्णकलशं पञ्चरत्नस ॥राम॥
मन्वितम् ॥५॥ वस्त्रेवारक्तके चैव संलिखेद्यन्त्रमुत्तमम् ॥ गर्भे संस्थापयेद्देवीं चण्डिकां हेमरूपिणीम् ॥ ॥५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥६॥ पंचामृतेश्च सुस्नातां चर्चितां गन्धकुंकुमैः। तथा रक्तेन वस्त्रेण शोभितां भक्तवत्सलाम् ॥७॥ गुरुदेश
विधिना पूजनीया प्रयत्नतः ॥ यन्त्रोद्धारः प्रयत्नेन ज्ञातव्योस्य नृपात्मज ॥८॥ चतुरस्रास्त्र्यस्रकं वह्निकोणं
संलिखेत्ततः ॥ ॐकुमा गन्धकर्पूरैश्चन्दनैश्च सितासितैः ॥९॥ एवं च कृतविधिं कृत्वा देवीं सावर्णिं पूजयेत्। आ
दौ पञ्चगुरून् पूज्य नानान्देवताद्वयम् ॥१०॥ पीठोपपीठनाथांश्च उपनाथांस्तथैव च ॥ पादुकाश्चोपपा
दांश्च वेतालानां चतुष्टयम् ॥११॥ पश्चाद्वृन्दाष्टकं चैव भैरवाष्टकमुत्तमम् ॥ लोकपालाष्टकं चै
व पूजयेन्मिथुनत्रयम् ॥१२॥ कालं मृत्युं ततः पश्चाद्द्विमन्त्रसिंहौ ततः परम्। सिंहासनेन तस्योत्तु म
हाकालीं सरस्वतीम् ॥१३॥ प्रधानं च ततश्चैव क्रमस्त्वेवमुदाहृतः ॥ पूजने चैवानुष्ठाने मंत्राज्ञेयारह

॥ च ॥ स्यच ॥ १४ ॥ ऋषिरुवाच ॥ इदं रहस्यं परमम् नाख्येयं प्रचक्षते ॥ भक्तोसीति न मे किंचित्तवावाच्यं नराधिप ॥
॥ ८२ ॥ ॥ १५ ॥ सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥ १६ ॥
मातुलिंगं गदां खेटं पानपात्रं च बिभ्रती ॥ नागं लिङ्गं च योनिं च बिभ्रती नृपमूर्द्धनि ॥ १७ ॥ तप्तकांचन
वर्णाभा तप्तकांचनभूषणा ॥ शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥ १८ ॥ शून्यं तदखिलं लोकं विलो
क्य परमेश्वरी ॥ बभार रूपमपरं तमसा केवलेन हि ॥ १९ ॥ सा भिन्नांजनसंकाशा दंष्ट्राञ्चितवरानना ॥
विशाललोचना नारी बभूव तनुमध्यमा ॥ २० ॥ खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥ कबन्धहारं शु ॥ राम ॥
रसा बिभ्राणा हि शिरःस्रजम् ॥ २१ ॥ सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा ॥ नाम कर्म च मे ॥ ८२ ॥

82

मातर्देहिशुभंनमोनमः॥२२॥तांप्रोवाचमहालक्ष्मीस्तामसींप्रमदोत्तमां॥ददामितवनामानियानिकर्माणिता
नि च॥२३॥महामायामहाकालीमहामारीक्षुधातृषा॥निद्रातृष्णाचैकवीराकालरात्रिर्दुरत्यया॥२४॥इमानि
तवनामानिप्रतिपाद्यानिकर्मभिः॥एभिःकर्माणितेज्ञात्वायोधीतेसोऽश्नुतेसुखम्॥२५॥तामित्युक्त्वामहाल
क्ष्मीःस्वरूपमपरंनृप॥सत्वाख्येनातिशुद्धेनगुणेनेन्दुप्रभंदधौ॥२६॥अक्षमालांकुशधरावीणापु
स्तकधारिणी॥साबभूववरानारीनामान्यस्यैचसाददौ॥२७॥महाविद्यामहावाणीभारतीवाक्सरस्वती
॥आर्याब्राह्मीमहाधेनुर्वेदगर्भाचधीश्वरी॥२८॥अथोवाचमहालक्ष्मीर्महाकालींसरस्वतीम्॥युवांज
नयतांदेव्यौमिथुनेस्वानुरूपतः॥२९॥इत्युक्त्वातेमहालक्ष्मीःससर्जमिथुनंस्वयम्॥हिरण्यगर्भौरुचिरौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ८२ ॥

स्त्रीपुंसौ कमलासनौ ॥ ३० ॥ ब्रह्मन्विधे विरंच्येति धातरित्याह तन्नरम् ॥ श्रीः पद्मे कमले लक्ष्मीत्याह मातास्त्रियं
वताम् ॥ ३१ ॥ महाकालीभारती च मिथुने स्सृजतः सह ॥ एतयोरपि रूपाणि नामानि च वदामि ते ३२ नीलकण्ठं
रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् ॥ जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥ ३३ ॥ स रुद्रः शंकरः स्थाणुः क
पर्दी च त्रिलोचनः ॥ त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा ॥ ३४ ॥ सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृ
प ॥ जनयामास नामानि तयोरपि वदामि ते ॥ ३५ ॥ विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ॥ उमा गौरी सती चंडी — गौ
सुन्दरी सुभगा शुभा ॥ ३६ ॥ एवं युवतयः सद्यः पुरुषत्वमुपेदिरे ॥ चक्षुष्मन्तो नु पश्यन्ति नेतरे माद्विदो बुधाः ॥ ३७ ॥ ब्र — ॥ राम ॥
ह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम् ॥ रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥ ३८ ॥ स्वरया सह संभू — ॥ ८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अविरिञ्चोराज्ञमजीजनत्॥ विभेद भगवान्रुद्रस्तज्ञोर्य्यासहवीर्य्यवान्॥ ३९॥ अण्डमध्येप्रधानादिका
र्य्यजातमभून्नृप॥ महाभूतात्मकंसर्वंजगत्स्थावरजङ्गमम्॥ ४०॥ पुपोषमाल्लाभासतल्लक्ष्म्यासहकेशवः॥
महालक्ष्मीर्महाराजसर्वलोकमहेश्वरी॥ ४१॥ निराकाराचसाकारासैवनानाभिधानृप॥ नामान्तरैर्निरूप्यैषा
नाम्नानान्येनकेनचित्॥ ४२॥ इतिमार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येप्राधानिकरहस्यं
सम्पूर्णम्॥ श्रीः ॐ नमश्चण्डिकायै॥ ऋषिरुवाच॥ त्रिगुणातामसीदेवीसात्विकीयात्रिधोदिता॥ सास
र्वाचण्डिकाभद्रादुर्गाभगवतीर्य्यते॥ १॥ योगनिद्राहरेरुक्तामहाकालीतमोगुणा॥ मधुकैटभनाशार्थं
यांतुष्टावांबुजासनः॥ २॥ दशवक्त्रादशभुजादशपादांजनप्रभा॥ विशालयाराजमानात्रिंशल्लोचनमाल

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥ या ॥३॥ स्फुरद्दशनदंष्ट्रा(सा) भीमरूपानुभूमिप रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम् ॥४॥ खड्गबाणगदाशू
॥ ५ ॥ लशंखचक्रभुशुण्डिभृत् । परिघं कार्मुकं शीर्षं निश्चोतद्रुधिरं दधौ ॥५॥ एषा सा वैष्णवी माया महाकाली
नमोत्यया । आराधिता वशीकुर्य्यात्पूजाकर्तुश्चराचरम् ॥६॥ सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा ॥ त्रिगु
णा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥७॥ श्वेताननानीलभुजा सुश्वेतस्तनमण्डला । रक्तमध्या 84
रक्तपादा नीलजंघोरुरुन्मदा ॥८॥ सुचित्रजघना चित्रमाल्याम्बरविभूषणा । चित्रानुलेपना कान्तीरूपसौभाग्यशा
लिनी ॥९॥ अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् ॥१०॥ अ ॥ राम ॥
क्षमाला च कमलं बाणोऽसिः कुलिशं गदा । चक्रं त्रिशूलं परशुः शंखो घण्टा च पाशकः ॥११॥ शक्तिर्दण्डश्चर्म ॥ ९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

...in Public Domain. Digitization by eGangotri

चापंपानपात्रंकमण्डलुं॥ अलंकृतंभुजामेभिरायुधैःकमलासनाम्॥१२॥ सर्वदेवमयीमीशांमहालक्ष्मी-
मिमांनृप॥ पूजयेत्सर्वलोकानांसदेवानांप्रभुर्भवेत्॥ १३॥ गौरीदेहात्समुद्भूतायासत्वैकगुणाश्रया सा
क्षात्सरस्वतीप्रोक्ताशुम्भासुरनिवर्हिणी॥१४॥ दधौचाष्टभुजावाणमुशलंशूलचक्रभृत्॥ शंखंघण्टांलां
गलंचकार्मुकंवसुधाधिप॥१५॥ एषासम्पूजिताभक्त्यासर्वज्ञत्वम्प्रयच्छति॥ निशुम्भमथनीदेवीशुम्भासुरनि
वर्हिणी॥१६॥ इत्युक्तानिस्वरूपाणिमूर्तीनान्तवपार्थिव॥ उपासनांजगन्मातुःपृथगासान्निशामय॥
१७॥ महालक्ष्मीर्यदापूज्यामहाकालीसरस्वती॥ दक्षिणोत्तरयोःपूज्येपृष्ठतोमिथुनत्रयम्॥ १८॥
विरंचिःस्वरयामध्येरुद्रोगौर्याचदक्षिणे॥ वामेलक्ष्म्याहृषीकेशःपुरतोदेवतात्रयम्॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥वं॥
॥८५॥

श्री
राम
कृष्ण
शिव
हरि
नारायणनारायणनारायणनारायणनारायणनारायणनारायणनारायणनारायणना
वासुदेववासुदेववासुदेववासुदेववासुदेववासुदेववासुदेववासुदेववासुदेववासुदेववासुदे

८५

॥राम॥
॥८५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥१९॥ अष्टादशभुजामध्ये वामे वास्यादशानना ॥ दक्षिणोष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥ २०॥
यदा वाष्टभुजा पूज्या सुम्भासुरनिवर्हणी ॥ नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ ॥२१॥
नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् ॥ अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः ॥२२॥
श्रि० अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥ दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ २३॥ काल
मृत्यू च सम्पूज्यौ सर्वारिष्टप्रशान्तये ॥ अष्टादशभुजा पूज्या महामहिषमर्दिनी ॥ २४॥ महाल
क्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ॥ ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥२५॥ महि
षा[illegible]न्तकरी येन पूजिता स जगत्प्रभुः ॥ लिखित्वाष्टदलं पद्मं चन्दनागुरुकुंकुमैः ॥२६॥

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ८६ ॥

षह्लेगांचैवतन्मध्येदेवींतन्मध्यतोयजेत् ॥ कुर्यान्मुसंयुतःपूजांतस्याएकाग्रमानसः ॥ २७ ॥
पूजयेज्जगतान्धात्रींचण्डिकाम्भक्तवत्सलाम् ॥ अर्घ्यादिभिरलंकारैर्गन्धपुष्पैस्तथाक्ष
तैः ॥ २८ ॥ धूपैर्दीपैश्चनैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥ रुधिराक्तेनबलिनामांसेनसुरयानृप ॥
॥ २९ ॥ प्रणामाचमनीयेनचन्दनेनसुगंधिना ॥ सकर्पूरैश्चताम्बूलैर्भक्तिभावसमन्वितैः ॥ ३० ॥
॥ वामभागेग्रतोदेव्याश्छिन्नशीर्षंमहासुरम् ॥ पूजयेन्महिषंयेनप्राप्तंसायुज्यमीशया ॥ ३१ ॥
दक्षिणेपुरतःसिंहंसमग्रंधर्ममीश्व[illegible]रम् ॥ वाहनम्पूजयेद्देव्याधृतंयेनचराचरम् ॥ ३२ ॥
ततःकृतांजलिर्भूत्वास्तुवीतचरितैरिमैः ॥ एकेनवामध्येमनेनैकेनेतरयोरिह ॥ ३३ ॥ चरितार्द्धेनु

॥ राम: ॥
॥ ८६ ॥

८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नजपेज्जपसिद्धिमवाप्नुयात ॥ स्तोत्रमंत्रैः स्तुवीतेमांयदिवाजगदम्बिकाम् ॥ ३४ ॥ प्रदक्षिणा·
नमस्कारान्कृत्वामूर्द्ध्निकृतांजलिः ॥ समापयेज्जगद्धात्रीमहर्म्मुहुरतन्द्रितः ॥ ३५ ॥ प्रतिश्लोकं
वजुहुयात्पायसन्तिलसर्पिषा ॥ जुहुयात्स्तोत्रमंत्रैर्वा चण्डिकायै शुभं हविः ॥ ३६ ॥ भूयोना
मपदैर्देवीं पूजयेत्सुसमाहितः ॥ प्रयतः प्रांजलिः प्रह्वः प्रणम्यारोप्य चात्मनि ॥ ३७ ॥ सुचिरंभा
वयेदीशां चण्डिकान्तन्मयोभवेत् ॥ एवं यः पूजयेद्भक्त्याप्रत्यहंपरमेश्वरीम् ॥ ३८ ॥ भुक्त्वाभोगा
न्यथाकामान्देवीसायुज्यमाप्नुयात् ॥ योनपूजयतेनित्यंचण्डिकांभक्तवत्सलाम् ॥ भस्मीकृ
त्यास्यपुण्यानिनिर्दहेत्परमेश्वरी ॥ तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ॥ ४० ॥ यथोक्तेन

॥ वै ॥
॥ ८१ ॥

विधानेन वणिक्कोसुरथमाख्यसि ॥ ४७ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये-
वैकृतिकं रहस्यं समाप्तम् ॥ ॐ श्रीः ॥ ऋषिरुवाच ॥ नन्दा भगवती नाम या भविष्यति नन्दजा ॥ सा
स्तुता पूजिता भक्त्या वशीकुर्याज्जगत्त्रयम् ॥ १ ॥ कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ॥
देवी कनकवर्णाभा कनकोत्तमभूषणा ॥ २ ॥ कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिराक-
मला लक्ष्मीः सा श्रीरुक्माम्बुजासना ॥ ३ ॥ या रक्तदन्तिका नाम देवी प्रोक्ता मयानघ ॥ तस्याः
स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् ॥ ४ ॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ रक्ताम्बरा
रक्तवर्णा रक्तसर्वाङ्गभूषणा ॥ ५ ॥ रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥ रक्ततीक्ष्णनखा रक्त-

87

॥ रामः ॥
॥ ८१ ॥

दशनारक्तदंतिका ॥ ६ ॥ पतिन्नारीवानुरक्ता देवी भक्तं भजेज्जनम् ॥ वसुधेव विशाला सा मेरुयुगलस्त-
नी ॥ ७ ॥ दीर्घौ लंबावतिस्थूलौ तावतीव मनोहरौ ॥ कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी-
॥ ८ ॥ भक्तान्संपाययेद्देवी सर्वकाममदुघौ स्तनौ ॥ खड्गं पात्रं च मुशलं लांगूलं च विभर्ति सा ॥ ९ ॥
आख्याता रक्तचामुण्डा देवी योगेश्वरीति च ॥ अनया व्याप्तमखिलं जगत्स्थावरजंगमम् ॥ १० ॥
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥ अधीते य इमं नित्यं रक्तदन्त्या वपुःस्तवम् ॥ ११ ॥ तं
सा परिचरेद्देवी पतिं प्रियमिवांगना ॥ शाकंभरी नीलवर्णा नीलोत्पलविलोचना ॥ १२ ॥ गंभीरनाभि-
स्त्रिवलीविभूषिततनूदरी ॥ त्रिवलीरत्नमध्यस्थरोमराजिविभूषिता ॥ १३ ॥ सुकर्कशसमोत्तुङ्ग-

॥ सं ॥
॥ २२ ॥

वृत्तपीनघनस्तनी ॥ पुष्टिं शिलीमुखैर्वेः पूर्णां कमलं कमलालया ॥ १४ ॥ पुष्पपल्लवमूलादि फलाढ्यं
शाकसंचयम् ॥ काम्यानंतरसैर्युक्तं क्षुत्तृण्मृत्युज्वरापहम् ॥ १५ ॥ कार्मुकं च स्फुरत्कांति विभ्र
ती परमेश्वरी ॥ शाकंभरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥ १६ ॥ उमा गौरी सती चण्डी कालिका च
शा च पार्वती ॥ शाकंभरीं स्तुवन् ध्यायन् जपन् संपूजयन्नमन् ॥ १७ ॥ अक्षय्यमश्नुते शीघ्रमन्नपानामृ
तान्यलम् ॥ भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥ १८ ॥ विशाललोचना नारी वृत्तपीनपयोध
रा ॥ चंद्रहासं च डमरुं शिरःपात्रं च बिभ्रती ॥ १९ ॥ एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥ ते
जोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत् ॥ २० ॥ चित्रानुलेपना देवी चित्राभरणभूषिता ॥ चित्र

॥ रामः ॥
॥ २२ ॥

88

भ्रमरपाणिः स्मा महामारीतिगीयते ॥ २१ ॥ इत्येतामूर्त्तयो देव्या व्याख्याता वसुधाधिप ॥ जगन्मातु
श्चण्डिकायाः कीर्त्तिताः कामधेनवः ॥ २२ ॥ इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥ व्याख्यानं दि
व्यमूर्त्तीनामभीष्टावहितः स्वयं ॥ २३ ॥ गोपनीयं प्रयत्नेन रहस्यं परमं जपन् ॥ देव्याध्यानम्म
यापोक्तं गुह्याद्गुह्यतरम्महत् ॥ २४ ॥ तस्मात्सर्वप्रयत्नेन सर्वकामफलप्रदम् ॥ मिध्यापज्ञातथास्र
द्धाधारणाकान्तिरेव च ॥ २५ ॥ भवन्ति स्तुवतो नित्यं चण्डिकां मानवस्य च ॥ सप्तजन्मानि पापानि
ब्रह्महत्यासमानि च ॥ २६ ॥ पठनाद्ध्यानमात्रेण मुच्यते नात्र संशयः ॥ २७ ॥ इति मार्कण्डेयपु
राणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मूर्त्तिरहस्यं सम्पूर्णम् ॥ ॥ श्रीः अथ तन्त्रोक्तम्महाकालीमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ दे ॥
॥ ८९ ॥

सौ२ श्री२

लक्ष्मीमहासरस्वतीत्रयाविग्रहसूक्तंलिख्यते ॥ ॥ ॐ ॥ अस्यश्रीदेवीसूक्तमालामंत्रस्यमार्कंडेयमे
धाऋषीगायत्र्यादिनानाविधानिछंदांसित्रिशक्तिरूपिणीश्रीचंडिकादेवताऐंबीजंह्रींशक्तिः
क्लींकीलकंममचिंतितमनोरथसिद्ध्यर्थेजपेविनियोगः ॥ मार्कंडेयमेधाऋषिभ्यान्नमःशिर
सि ॥ गायत्र्यादिनानाविधेभ्योछंदोभ्योनमोमुखे ॥ त्रिशक्तिरूपिण्यैश्रीचंडिकायैदेवता
यैनमोहृदये ॥ ऐंबीजायनमोगुह्ये ॥ ह्रींशक्तयेनमःपादयोः ॥ क्लींकीलकायनमःसर्वांगे ॥ श्री
महाकालीमहालक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थेजपेविनियोगः ॥ अथन्यासः ॥ ॐ ऐं अङ्गुष्ठाभ्या
न्नमः ॥ ॐ ह्रीं तर्जनीभ्यान्नमः ॥ ॐ क्लीं मध्यमाभ्यान्नमः ॥ ॐ ऐं अनामिकाभ्यान्नमः ॥ ॐ ह्रीं क

एमः
॥ ८९ ॥

89

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निष्ठिकाभ्यान्नमः॥ ॐ क्लीं करतलकरपृष्ठाभ्यान्नमः॥ ॐ ऐं हृदयाय नमः॥ ॐ ह्रीं शिरसे स्वाहा॥
ॐ क्लीं शिखायै वषट्॥ ॐ ऐं कवचाय हुं॥ ॐ ह्रीं नेत्रत्रयाय वौषट्॥ ॐ क्लीं अस्त्राय फट्॥
ॐ भूर्भुवः स्वरोम्॥ इति दिग्बन्धः॥ अथ ध्यानम्॥ योगाद्यामरकार्यनिर्गतमहत्तेजःसमुत्प-
त्तिनिभास्वत्सूर्याग्निशशाङ्कचारुवदनानीलोल्लसद्भ्रूलता॥ गोरोत्तुंगकुचद्वयानतडुपरिस्फूर्ज-
त्प्रभामराड्लावंधूकारुणकायकान्तिरवताच्छ्रीचराङ्कामर्वत॥ १॥ इति ध्यात्वा मन्त्रं सोपचा-
रैः सम्पूज्य परान्देवीम्मूलं जपेत्॥ ॐ ऐं ह्रौं क्लीं हसरव हूं महत्स्नौं सौं जयजय महालक्ष्मी जय घ-
नाघवीजे सुरासुरत्रिभुवननिदाने दयांकुरु सर्वतेजोरूपिणि महामहामहिमे महामायास्वरूपि-

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ९० ॥

णि महामहामाये विरंचिसंस्तुते विविधवरदे विद्यानन्दे विष्णुदेहावृते महामोहिनि मधुकैटभ-
जंघाशिनि नित्यवरदानतत्परे महासुधाब्धिवासिनि महामहातेजोधारिणि सर्वाधारे सर्वरूपका-
रणकारणे अचिन्त्यरूपे इन्द्रादिनिखिलनिर्जरसेविते सामगानगायिनि पूर्णोदयकारिणि विजये
जयन्ति अपराजिते सर्वसुन्दरि रक्तांशुके सूर्यकोटिसंकाशे चन्द्रकोटिसुशीतले अग्निकोटिदहनशी-
लेयमकोटिक्रूरे ॐकारनादस्वरूपे निगमागममार्गदायिनि महिषासुरनिर्दलिनि धूम्रलोचनवध-
परायणे चण्डमुण्डादिशिरश्छेदिनि रक्तबीजादिरुधिरशोषिणि रक्तपानप्रिये महायोगिनि भू-
तवेतालभैरवादितुष्टिविधायिनि निशुम्भसुम्भ[illegible]छेदिनि निखिलासुरबलखादिनि त्रिदशरा

॥ एम ॥
॥ ९० ॥

90

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्यदायिनिसर्वेश्वरीरत्नरूपिणिनिस्पृहदेहेनिर्गुणेसमस्तरूपधारिणिसकलनरवरदेभक्तत्राणतत्परेश्वरे
वरेसहस्त्रारेअष्टताश्रेसप्तकोटिचामुण्डारूपिणिनवकोटिकात्यायनीरूपेअनेकलक्षरूपेइन्द्रा
णिरुद्राणिब्रह्माणिकौमारिवैष्णविवाराहिशिवदूतिईशानिभिमेधामारिनाँसिंहिचयिस्त्रिंश १२
त्कोटिदैवतेअनन्तकोटिब्रह्माण्डनायिकेचतुरशीतिलक्षमुनिजनसंस्तुतेसप्तकोटिमंत्रस्वरूपे
महाकालरात्रिप्रकाशेकलाकाष्ठादिरूपिणिचतुर्दशभुवनाविर्भावकारिणिगरुडगामिनिक्रोंकौंरे
ह्रींकारह्स्त्रौंकारस्त्रौंकारजूंकारस्त्रौंकारऐंकारक्लिंकारह्लौंकारहूंकारह्स्लौंकारनामबीजकूट
निर्मितशरीरेसकलसुन्दरीगणसेवितचरणारविन्देश्रीमहाराज्ञित्रिपुरसुन्दरीकामेशदयितेकरु

॥वं॥
॥९१॥

गारसमकल्लोलिनि कल्पवृक्षाधःस्थिते चिन्तामणिदीपावस्थिते मणिमन्दिरनिवासे चापिनि चक्रि
णि खड्गिनि गदिनि शंखिनि पद्मिनि निखिलभैरवाराधिते समस्तयोगिनीपरिवृते कालिके का
लितारे तोतले सुतारे ज्वालामुखि छिन्नमस्तके भुवनेश्वरि त्रिपुरे त्रैलोक्यजननि श्रीविष्णुवक्षः
स्थलालंकारकारिणि अमिते अजिते अमराधिपे अनौपम्यचरिते गर्भवासादि दुःखापहारिणिमु
क्तिसेवाधिष्ठायिनि शिवे शान्ति कुमारि देवीस्तूक्तदशाशताक्षरे चण्डिके चामुण्डे महाकाली महाल
क्ष्मी महासरस्वती त्रयीविग्रहे प्रसीद सर्वमनोरथान् पूरय पूरय सर्वारिष्टविघ्नान् छेदय सर्वग्रहपी
डाज्वरोपग्रहभयं विध्वंसय सर्वं त्रिभुवनजीवजातं वशमानय २ मोक्षमार्गन्दर्शय २ प्रकाशय २ अं

९।
॥रामः॥
॥९१॥

ज्ञानतमो निरस्तय २ धनधान्यादि हृद्धिं कुरु २ सर्वकल्याणानि कल्पय २ मां रक्ष २ सर्वापद्भ्यो निस्ता-
रय २ मम वज्रशरीरं साधय २ ॐ ऐं ह्रीं क्लीं चामुण्डायै स्वाहा ॐ नमस्ते २ स्वाहा इति नेत्रोक्तं नेत्री
त्रयी विग्रहस्तक्रम ॥ ॐ तत्सन्महाकाली महालक्ष्मी महासरस्वती देवता प्रीणामस्तु ॐ महाकाली म-
हालक्ष्मी महासरस्वती देवता प्रीतास्तु ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ ॐ या देवी मधुकैटभप्रमथि-
नी या माहिषोन्मूलिनी या धूम्रेक्षणचण्डमुण्डदलिनी या रक्तबीजाशनी ॥ शक्तिः शुम्भनिशुम्भदै-
त्यदलनी या सिद्धलक्ष्मीः परा सा चण्डी नवकोटिशक्तिसहिता मां पातु विश्वेश्वरी ॥ १ ॥ या कुन्देन्दु-
तुषारहारधवला या शुभ्रवस्त्रावृता या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ॥ या ब्रह्माच्युत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंकरप्रभृतिभिर्देवैःसदावन्दितासामाम्पातुसरस्वतीभगवतीनिःशेषजाड्यापहा॥४॥इतिविद्या
तपोयोनिरयोनिर्विष्णुरीडिता॥वाग्पजेनार्विनादेवीज्ञेयताम्परमेश्वरी॥३॥ ॐ समाप्तम्॥ मा
र्कण्डेयपुराणोक्तंदेवीमाहात्म्यमुत्तमम्॥विपरीतन्तुयत्सर्वंक्षमस्वपरमेश्वरि॥४॥यदक्षरपद
भ्रष्टंस्वरव्यंजनवर्जितम्॥तत्सर्वंक्षम्यतांदेविप्रसीदपरमेश्वरि॥३॥आवाहनन्नजानामिनजाना
मिविसर्जनम्॥पूजार्चनंनजानामिक्षम्यतांपरमेश्वरि॥४॥गतंदुःखंगतंपापंगतन्दारिद्र्यमे
वच॥आगतासुखसम्पत्तिःपुण्योहन्तवदर्शनात्॥५॥मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्व
रि॥यत्पूजितासिमयादेवितत्सर्वंवरदाभव॥६॥आवाहनञ्चपूजाञ्चतन्माहात्म्यंजपन्तथा।
यःपठेच्छृणुयाद्भक्त्यातस्यमुक्तिर्नसंशयः॥अज्ञानाद्विस्मृतेर्भ्रान्त्यायन्न्यूनमधिकंकृतम् १ +२

92

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विसर्जनेनन्त्वजानामिचंशिरःकेत्वंक्षमस्वमे ॥७॥ कामेश्वरिजगन्मातःसच्चिदानन्दविग्रहे॥ गृहाणा
र्चामिमांसर्वांप्रसीदकरुणानिधे ॥८॥ गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपम्॥ सिद्धि
र्भवतुमेमातस्त्वत्प्रसादान्महेश्वरि॥९॥ अनेनसप्तशतीस्तोत्रमंत्रनवार्णविधानदेवीमंत्रदे
वीसूक्तमंत्रजपाख्येनकर्मणाभगवत्योश्रीमहाकालीमहालक्ष्मीमहासरस्वत्योर्देवता
प्रीयन्ताम् नमम॥ ॐ तत्सत्ब्रह्मार्पणमस्तु ॥ श्रीः मत्समोनास्तिपापिष्ठस्त्वत्समोनास्तिपा
पहा॥ इतिसंचिंत्यसंचिंत्यशरणान्त्वंधारयाम्यहम् ॥१॥ पापोहम्पापकर्माहंपापात्मापापसं
म्भवः॥ त्राहिमांकृपयालक्ष्मीःसर्वपापहराभव ॥२॥ मादृशोननरःपापीत्वादृशोनदयापर

॥ वं ॥
॥ ९३ ॥

इतिमत्वामहल्लक्ष्मीरक्षमां शरणागतम् ॥ ३ ॥ अपराधसहस्राणि क्रियन्तेहर्निशम्मया ॥ दा
सोयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ ४ ॥ अन्यथा शरणन्नास्ति त्वमेव शरणम्मम ॥
तस्मात्कारुण्यभावेन रक्षमाम्परमेश्वरि ॥ ५ ॥ आपन्नस्तु मग्नः स्मरं त्वदीयं करोमि दुर्गे करु- रा ३
णार्णवेशि वे ॥ नैतच्छठत्वम्मम भावयेथाः क्षुधातृषार्त्ता जननीं स्मरन्ति ॥ ६ ॥ जगदंब विचित्रे
मत्र किं परिपूर्णा करुणास्ति यन्मयि ॥ अपराधपरम्परावृतं न हि माता किमुपेक्षते सुतम् ॥ ७ ॥ 93
शरणान्तकरान्नृणां वरः शरणाम्बापि गिरिजनकन्यका ॥ शरणम्पुनरेवतावुभौ शरणं नान्यदु
पैमि दैवतम् ॥ ८ ॥ तत्सत्भगवत्समर्पणमस्तु ॥ दुर्गाहोमविधानेन स्तोत्रकश्लोकैकमाहुतिः ॥ रक्षाक

॥ रामः ॥
॥ ९३ ॥

र्चनं चेश्वरेशानं तत्र न कारयेत् ॥ १॥ योमूर्खः कवचं हुत्वा प्रत्युवाच मनेश्वरम् ॥ स्वदेहस्परतेतस्य न
रकं प्रतिपद्यते ॥ २॥ अम्बिकश्च महादेव्या दुर्गाहोमपरायणा ॥ कवचाहुतिमात्रेण महेशेन निपाति
तं ॥ तिस्तोत्रं जपस्त्वं चवाविकस्यवनमानसः ॥ स्तोत्रे चैव मालायां चैव वा विकोजप इष्यते इति संहि
तोक्तेः ॥ मनसा यः पठेत्स्तोत्रं सम्यक् वसावामनुसंज्ञपेत् ॥ उभयन्निष्फलं तस्य भिन्नभाण्डोदकं यथा
इति निषेधात् ॥ शनैस्तु जप्यमानेऽस्मिन्स्तोत्रे चैव संपन्निरुच्चैः केऽरीति वा ॥ अत्युच्चैः पाठनिषेधता चपु
स्तकं किंचिदाधारे स्थापयित्वा जपो नष्टो यो न तु हस्ते ॥ तदुक्तं मात्राराहीतं चैव ॥ आधारे स्थापयित्वा तु
फो१ पुस्तकं वाचयेत्ततः ॥ हस्तसंस्थापनादेव विभवेदर्द्धफलं यतः इति ॥ स्तोत्रं चैव वस्यातिरिक्तेन द्वास्वरोन

॥ पं ॥
॥ ९८ ॥

लिखितमपठनीयम्॥ नन्वयं लिखितं स्तोत्रं नाद्या स्वरा लिपिम्पठेदिति वचनात्॥ श्री: ॐ नमस्त्रि
रिरकायै॥ अथ देवीमानसिपूजा॥ ॐ वेदा नैव बहुभिर्दयारसमयीमम्बोधमेवेडुमे कस्मात् कृत
नरः स्वकर्मसुजडस्त्वामर्चनोपालये: भूयादेवमथापि तावकजपान्मुक्तायमूर्त्तिस्फुरेदन्तर्मे सुख
सागरे चिरमहम्मग्नो भवेयं यथा॥ श्रीपरदेवतामावाहयामि॥ १॥ यद्दृश्यत वाग्रभूमिनिकटे मौ
लौ निधायाञ्जलिं सर्वान्तःकरणान्तरांगिरिसुते विज्ञापयेत्वामहम्॥ यद्यप्यज्ञभवाद्योपिन
हितेरस्मात्तथापर्वने स्मृतीनाभवडिम्भके मयि मनः पूजासमुद्योगिनी॥ २॥ काश्मीरद्रव
पाटलं हिमजलैः शान्तं सकर्पूरकैः कस्तूरीपठवासयोगि सुरभि श्रीचन्दनैकोद्भवम्॥ पाद्यं

९५

॥ राम: ॥
॥ ९८ ॥

द शिलामये सुनाहतं वाम्भेयतैलान्वितं लं गन्धम्मरिकल्पयामि ललिते तुभ्यं महीहेतवे ॥ ३ ॥ मल्ली
पंकजमालती परिमलम्मन्दारकुन्दोत्पलाशोकानेकशिरीषनीपविकसत्कल्हारजातीमु
खै ॥ नानानर्घ्यविभूषणैरपि महासौमेन साकं शुभे हन्त्वा स्मवमसमर्चयामि सुमनोहारैरनन्तात्मि
के ॥ ४ ॥ श्रीमत्पादयुगे सरोजहृदयव्यापामनोज्ञाकृतौ चेतन्पारव्यसुसंनिधाय मनसा त्वद्भक्ति
गन्धोत्कटम् ॥ स्वर्गीयागरुसुरव्यवस्तुनिवहाद्दुद्भूतमाशाप्रियेयन्धूपमप्यवन॰ स्वरूपभवती माघ्रा
म॰२ पयार्द्भुतम् ॥ ५ ॥ भक्त्या चन्द्ररुचिप्रवाहधवलश्रीशालिवर्त्तार्पितान्श्रीगन्धोद्भवतैलवर्द्धितशि
खान्॰ सौवर्णपात्रीगतान् ॥ घंटावाद्यमनुत्तमगीतिभिरलम्मंत्रै मया वेदिके रन्दीपाननलात्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ चं ॥
॥२५॥

केतवपुरोन्मस्तान्नृशिवेलोकय ॥२॥ सम्यग्गोघृतपक्वभक्ष्यनिकरैर्लेह्यैश्चचोष्यैस्तथाभोज्यान्नैर
मितैः सुशाकसहितैर्माषाशिकापानार्पितैः ॥ कर्पूरेणसुवासितैः सुरनदीतोयैर्मयासम्भृतम्त्व
न्त्वामम्बजलान्यपिकेमृतमयन्नैवेद्यमावेदये ॥३॥ पूजाहृद्युतमेनिषीदशुभदेचक्रासनेगृह्यता
नाम्बूलंसुरसुन्दरीकरगतानकर्पूरदीपान्बहून् ॥ अस्मन्मङ्गलकारकान्सहपरीवारैस्त्वमा
लोकयेः पश्चात्पुष्पमयांजलिंत्वयिशिवेन्यस्यामिसन्तुष्टये ॥५॥ प्रादक्षिण्यशतंविधायशि
रसास्त्वायेनिधायांजलिंस्तुत्वावेदशिरोभिरम्बनितरांस्तोत्रैःस्वकीयैरपि । उद्यद्भानुसहस्र
कोटिनिवहच्छायामनोज्ञाकृतिंत्वामानौमिपुनःकरोमिविनतिंभूयोपिनम्रोस्मिते ॥६॥ रम्भो

१८
॥ राम ॥
॥१८५॥

अख्यसुरेन्द्रवारवनितानृत्यन्तियत्रसन्निधौहाहातुंबुरुनारदादिविबुधागायन्तियत्संस्तुती:
यामागस्त्यमुखर्षिवर्यनिवहाध्यायन्तियत्पादुकान्तान्त्वामम्बसमाश्रयामिशरणंश्रीच-
क्रराजेश्वरी॥१०॥इदयोऽस्तु॥३॥श्री:॥ॐ त्रिपुरायैनम:॥ॐ ऐन्द्रस्येवशरासनस्यदधती
मध्येललाटप्रभांशौक्लींकान्तिमनुष्णगोरिवशिरस्यातन्वतीसर्वत:॥एषासौत्रिपुराहृदि
द्युतिरिवोष्णांशो:सदाहस्थितांछिंद्यान्न:सहसापदैस्त्रिभिरघंज्योतिर्मयीवाङ्मयीम्॥१
यामात्रात्रपुशीलतातनुलसत्तंतुस्थितिस्पर्द्धिनीवाग्वीजेप्रथमेस्थितातवसदातामन्म
हेतेवयम्॥शक्ति:कुण्डलिनीतिविश्वजननीव्यापारबद्धोद्यमांज्ञात्वेत्थन्नपुन:स्पृश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ चं ॥
॥ ९६ ॥

क्तिजननीगर्भेऽर्भकत्वं जनाः ॥ १ ॥ दृष्ट्वा सम्भ्रमकारि वस्तु सहसा ऐँ ऐँ इति व्याहृतं येनाकृतव
शात्पीह्वरदे विनुम्बिनाप्यक्षरम् ॥ तस्यापि क्रतुमेकेद्वितरमा जाते तवानुग्रहे वाचः स
क्तिसुधारसद्रवमुचो निर्यान्ति वक्त्रोदरात् ॥ २ ॥ यन्नित्येतव कामराजमखिलं मन्त्रास
दन्निष्कलनं तत्साररूपं तमिन्यवैति विरलः कश्चिद्बुधश्चेद्भुवि ॥ आख्यानस्मृतिपर्वसन्ततपसो
यत्कीर्तयन्तो द्विजाः प्रारम्भे प्रणवास्पदप्रणायतान्बालो ब्रुवन्तीस्फुटम् ॥ ४ ॥ यत्तस्य घोषवशा
स्यहीतिकरणेहृद्वाप्रभावम्बुधेस्नातीयन्त्रदह्नमानिमनसानतधीजमिन्दुप्रभम् ॥ अस्तौवेंपि
सरस्वतीमनुगतो जाड्याम्बुविछिन्नये गौत्रावैगोगरिवर्तन्ते सुनियतं योगं विनासिद्धयः ॥ ५ ॥ ए

96

॥ रामः ॥
॥ ९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि

केकत्तवदेवीजमनघंसवंजनात्यन्जनदूरस्थंयदिवापृथङ्कमगतंयत्रास्थितंत्युकमात्र·

यंपंकाममपेक्षयेनविधिनाकेनापिवाचिंतितंजप्तंवासफलीकरोतिसततंतत्त्वंममत्त्वन्तुशाम्भ

॥५॥ वामेपुस्तकधारिणीमभयदांम्बसत्स्रजंदक्षिणेभक्तेभ्योवरदानपेशलकरांकर्पूरकुन्दो·

ज्वलाम् ॥ उद्यन्नम्भोरुहपत्रकान्तिनयनांस्निग्धप्रभालोकिनींयेत्वामंबनशीलयन्तिमनसा

तेषांकवित्वंकुतः ॥६॥ येत्वाम्पाण्डुरपुण्डरीककर्पूरलसत्स्फटिकाभिरामप्रभांसिंचन्तीममृतद्रवैरि

वशिरोध्यायन्तिमूर्ध्निस्थिताम् ॥ अश्रान्तंविकटस्फुटाक्षरपदानिर्यान्तिवक्त्राम्बुजात्तेषा

म्भारतिभारतीसुरसरित्कल्लोललोलोर्मिवत् ॥७॥ येसिन्दूरपरागपुंजपिहितान्त्वतेजसाद्या

॥ चं ॥
॥ ८१ ॥

मिमांमुर्वीं वापि विलीनपावकरमधस्तारमग्नामिव ॥ पश्यंति स्मरामप्यनन्यमनसस्तेया
मनन्यज्वरक्लांतास्वस्नकुरंगशावकदृशोवश्यामवतिस्फुटम् ॥ ८ ॥ वञ्चत्काञ्चनकुराङ्गला
ङ्गदधरामावद्धकांचीस्त्रजं चेतां चेतसितन्वते स्मरामपिध्यायन्ति हृत्वास्थितिम् ॥ ते याम्वेश्म
सुविभ्रमारहहहः स्फाराभिवन्त्यस्थिरम्माद्यत्कुंजरकर्णतालतरलां स्थेयैर्यभजन्ते श्रियः ॥ १० ॥
आर्भाद्याः शशिशेखराङ्कमधिरूढं तं जटाजूटांतमुराङ्गस्रजं वंधूकप्रसवारुणाम्बरधराम्मेतामसनाथ्या
सिनीम् ॥ त्वाम्ध्यायन्ति चतुर्भुजां त्रिनयनामापीनतुङ्गस्तनीम्मध्येनिम्नवलित्रयांकिततनुन्त्वद्रू
पमाचिन्तये ॥ ११ ॥ जातोप्यल्पपरिच्छदे क्षितिभुजां सामान्यमात्रे कुले निःशेषावनिचक्रवर्त्ति

९७

॥ रामः ॥
॥ ८१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पस्वींलब्धाप्रतापोन्नतिम् ॥ यद्विद्याधरवृन्दवन्दितपदाः श्रीवत्सराजोभवद्देवीत्वच्चरणाम्बु
ज प्रणतयः सोयम्प्रसादोदयः ॥ १२ ॥ चरिडत्वच्चरणाम्बुजार्चनकृते विल्वीदलोल्लुंठनात्रुट्य
त्कंटककोटिभिः परिचयंयेषांनजग्मुः कराः ॥ ते दण्डांकुशचक्रचापकुलिशश्रीवत्समत्
स्यांकितैर्जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥ १३ ॥ विप्राः क्षोणिभुजो विशः
स्तदितरे क्षीराज्यमध्वासवैस्त्वां देवि त्रिपुरे परापरकलां सन्तर्प्य पूजाविधौ ॥ यां यां प्रार्थयते म
नः स्थिरधियान्तेषां त एव ध्रुवं तान्तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृतां ॥ १४ ॥ शब्दानां ज
ननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे त्वत्तः केशववासवप्रभृतयोप्याविर्भवन्ति ध्रुवम् ॥ लीयन्ते

॥ बं ॥
॥ ९८ ॥

येर्लुप्यन्तकल्पविरमेवत्साऽस्यस्तेप्यमीसत्वंकाचिदचिन्त्यरूपगहनाशक्तिःपरागीयसे ॥१५॥ देवा-
नांत्रितयंत्रयीहुतभुजांशक्तित्रयंत्रि:स्वरास्त्रैलोक्यंत्रिपदीत्रिपुष्करमथत्रिब्रह्मवर्णास्त्रयः
॥ यत्किंचिज्जगतित्रिधानियमितंवस्तुत्रिवर्गादिकंतत्तत्सर्वंत्रिपुरेतिनामभगवत्यन्वेतितेत-
त्वतः ॥१६॥ लक्ष्मीराजकुलेजयांरणमुखेक्षेमंकरीमध्वनिक्रव्यादद्विपसर्पभाजिशबरींकान्तार-
दुर्गेगिरौ ॥ भूतप्रेतपिशाचजम्बुकभयेस्मृत्वामहाभैरवींव्यामोहेत्रिपुरांतरन्तिविपदस्तारांच-
तोयप्लवे ॥१७॥ मायाकुण्डलिनीक्रियामधुमतीकालीकलामालिनींमातंगीविजयाजयाभ-
गवतीदेवीशिवाशाम्भवी ॥ शक्तिःशंकरवल्लभात्रिनयनावाग्वादिनीभैरवीह्रींकारीत्रिपुरेस्वरा

॥ रामः ॥
॥ ९८ ॥

90

रिभिरयक्षानैस्त्वैतेः सत्वैरेः ॥१८॥ आर्द्रापङ्क्तिवितैः परम्परयुतैर्दिविक्रमाद्यक्षरैः काव्यैः शांति
गतैः स्वरादिभिरयक्षानैस्त्वैतेः सत्वैरेः ॥ नामानि त्रिपुरे भवन्ति खलु यान्यत्यन्तगुह्यानि ते तेभ्यो
भैरवपत्नि विंशति शिवे तेभ्यो परेभ्यो नमः ॥१९॥ बोद्धव्या निपुणैर्बुधैः स्तुतिरियं कृत्वा मनस्तद्गत
म्भारम्भात्रिपुरे त्वनन्यमनसो यज्ञाद्यहंतेस्फुटम् ॥ एकद्वित्रिपरक्रमेण कथितस्त्वत्पादसं
ख्याक्षरैर्मन्त्रोद्धारविधिर्विशेषसहितः सत्सम्प्रदायान्वितः ॥२०॥ सावद्यं निरवद्यमस्तु य
दि वा किम्वानया चिन्तया नूनं स्तोत्रमिदम्पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि ॥ संचिन्त्या
पि लघुत्वमात्मनि दृढं संजायमानं हठात्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥थं॥
॥९९॥

॥२१॥ आनन्दोद्भवकंपपूर्णनयनानिद्राहहासम्भुवंवेदव्याकरणावगाहकविताक्षोभादिसिः
द्धष्टकम् ॥ वर्णावर्षपुरप्रवेशनगरक्तकौक्तिमुक्तिप्रदंलब्धाजाप्यमिदंकरोतिसततंयोगीभ
वेत्तद्भवम् ॥ २२ ॥ गौरित्र्यम्बकपत्निपार्वतिशिवेत्रैलोक्यमातःशिवेशर्वाणित्रिपुरेभवानिवर
देरुद्राणिकात्यायनि ॥ भीमेभैरविचण्डिसर्वमकलेकालेक्षयेश्मलिनित्वन्पारप्रणतास्वनन्यम
मनसापश्यांकुलांस्त्राहिवः ॥ २३ ॥ आद्यामबह्मरजनीश्वरविंदुनादमेकाक्षरम्पदमिदंकमिका
वदन्ती ॥ मंत्राहियेनभुवनत्रयकांकितंचसृष्टिस्थितिप्रलयहेतुमचिन्त्यरूपंम ॥ २४ ॥ यद्दिज
पतिजन्मात्मादेपरम्मन्त्रराजंभवतिभुविकवीन्द्रःसर्ववादीन्द्रजेता ॥ इदमपिकविमस्याम्मस्यमा

॥राम॥
॥९९॥

९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नङ्गरागस्खलितमदजलौघैः पिच्छलं द्वारदेशाः ॥ २५ ॥ आनन्दसुन्दरपुरन्दरमुक्तिमाल्यान्मौ
लौ हठेन निहितं महिषासुरस्य ॥ पादाम्बुजं भवतु मे विजयाय मंजुमञ्जीरसिञ्जितमनोहरमम्बि
कायाः ॥ २६ ॥ इति लघ्वाचार्यविरचितं लघुस्तवम् सम्पूर्णम् ॥ ॥ श्रीमहागणपतये नमः ॥
अथ पूर्वाङ्गो षोडशाङ्गुलमितां चतुरङ्गुलोन्नतां समस्तचतुरस्त्रां वेदिं कृत्वा तत्र मृद्गोघृतैनैक
स्मिन्पात्रे त्रयोदशदीपान् हृद्वर्तिषु अज्वाल्य ॥ प्रथमदीपे प्रथमा ध्याय देवतामावाह्यासनपा
द्यादिपुष्पपर्य्यन्तां पूजां कृत्वा धूपदीपौ दत्वा पायसं निवेद्य ताम्बूलदक्षिणादिनीराजनान्तं
कृत्वा ॥ नवभिः श्लोकैः पुष्पसमर्प्पणमभये पुष्पाञ्जलिं दत्वा एकत्रासनगां सुवासिनी च भोज

CC-0. In Public Domain. Digitization by eGangotri

॥ वं ॥ यिष्ये ॥ इति संकल्प ॥ द्वितीयाध्यायविधिं कुर्य्यात् ॥ एवं त्रयोदशाध्यायान्तं कृत्वा पुनर्महापूजां
॥१००॥ कुर्य्यात् ॥ अनुग्रहे पूर्वोक्तो निग्रहे त्वपरोक्तो समाप्तिः ॥ नैवेद्यश्लोकाः ॥ विश्वेश्वरी जगद्धात्री ॥ १
स्तुताः सुरैः पूर्वमभीष्टसंश्रयात् ॥ २ ॥ यासां प्रतं चोद्गत ॥ ३ ॥ सर्वाबाधाप्रशमनम् ॥ ४
सर्वमङ्गलमाङ्गल्ये ॥ ५ ॥ सृष्टिस्थितिविनाशानाम् ॥ ६ ॥ शरणागतदीनार्त ॥ ७ ॥ सर्व
स्वरूपे सर्वेशे ॥ ८ ॥ देविप्रपन्नार्तिहरे ॥ ९ ॥ धनार्थं बिल्वदलैः पूजा ॥ वश्यार्थं करवीरजे जं 100
जपाकुसुमैर्वा ॥ पुत्रार्थं तुलसीदलैः ॥ पुष्पार्थं पंकजैः तर्पणो त्रयोदशसु पात्रेषु देवता आवाह्या
घनयोः ॥ पुष्पाञ्जलिं च दत्वा ॥ प्रतिश्लोकान्ते प्रथमाध्यायदेवता तर्पयामि नमः इत्यादि प्रयोगे राज ॥ रामः ॥
॥१००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योदशाध्यायान्यमेत॥ गोदुग्धेन त्रयोदशाध्यायान्प्रणान्तर्पणं चकार्य्यम्॥ होमे त्रयोस्वग्निषु क्रम
तत्तदध्यायदेवता आवाह्यसम्पूज्य प्रतिश्लोकं॥ ॐ प्रथममाध्यायदेवतायै नमः स्वाहेति प्रयो
गः॥ परार्थे तु तस्याः मन्त्रु यजमानस्य कामा इति प्रतिश्लोकं पठेत्॥ त्रयोदशाकुमारीः सुवासि
नीर्वा यथोक्तलक्षणाः सम्पूज्य पूर्ववत्पुष्पांजल्यादि विधाय प्रतिश्लोकान्ते ग्रासा देया॥ प्रतिप्र
योगसम्पूर्णतायै त्रयोदशाकुमारीः सुवासिनीर्वा अनुपनीतमेकमष्टवार्षिकमुपनीतं च भोजये
त्॥ महाप्रयोगे तु षोडशमाषैः सुवर्णमूर्त्तिं कृत्वा तस्य प्रयोगः॥ यावत्प्रयोगसमाप्ति कलशस्थाप
नं कार्य्यम्॥ घृतेन दीपाः पायसन्नैवेद्यम्॥ एवम्पूजाविधिः॥ पीठेषु दीपेषु अक्षतपुंजेषु जलपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रेषु अग्नीषु कुमारीषु कार्य्यं ॥ एकस्मिन्वा अग्नौ त्रयोरश्चाध्यायदेवतापूजादि ॥ अथ मन्त्रसिद्ध्या
दि ॥ प्रतिश्लोकमाद्यन्तयोः प्रणवं जपेन्मन्त्रसिद्धिः ॥ प्रणवं व्याहृतित्रितयम्प्रतिश्लोकमादौ पठेन्मं
त्रसिद्धिः ॥ सप्तव्याहृतिपूर्वकं श्लोकं कृत्वा महाह्लोवं जपेन्मन्त्रसिद्धिः ॥ सप्तसप्तव्याहृतिकां गायत्रीं प्रति
श्लोकमादायतेवाहृत्वा जपेन्न देवं फलम् ॥ प्रतिश्लोकं सव्याहृतिकां गायत्रीं जपेन्न देवम्फलम् ॥ प्र
तिश्लोकमादौ जातवेदसइत्युवं जपेत् सर्वे कामाः सिध्यन्ति ॥ अत्यमृत्युवारणायादौ त्र्यम्बकं मंत्रं
जपेत् ॥ रोगादिक्षयमृत्युनाशमुन्मीलनमभीप्सता ॥ जप्यः शतात्सरोमंत्रः सर्वापद्विनिवारणः ॥
गायत्रीजातवेदसे त्र्यम्बकेति शतात्सरः ॥ प्रतिश्लोकं शरणागतदीनार्त० श्लोकम्पठेत् सर्वकार्य०

101

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिद्धिः ॥ प्रतिश्लोकम्पात्यर्धं वा करोतु समानः शुभहेतुरीश्वरीत्यर्धं पठेत्सर्वकार्यसिद्धिः ॥ अथ रक्षापो-
च्चारः ॥ त्रयोरक्षाध्यायम्पठित्वा· प्रथमं ततो रक्षाम्पाठित्वा द्वितीयमवशिष्टाश्चक्रमेणापठेत्
॥ सम्पुटं द्विरिति ॥ अथोत्कीलनम् ॥ मध्यमचरित्रमादौ पठित्वा प्रथमं तृतीयचरित्रे पठेदिति
॥ पूर्वं यथाक्रमं त्रयोरक्षाध्यायान्पठित्वा ॥ विलोमान्पुनरनुलोमानित्यावृत्तित्रयेणाशीघ्रसिद्धिः ॥
सर्वाभीष्टवरप्राप्त्यै एवं देव्या वरं लब्ध्वेति प्रतिश्लोकम्पठेत्· सर्वापद्विनिवारणाय दुर्गे स्मृतेति अर्द्ध-
म् ॥ ततो यदन्तियच्च दूरे इति ऋचं जपेत् ॥ तदन्ते दारिद्र्यदुःखभयहारिणीति पठेत् ॥ महति कार्ये
लक्षमयुतं सहस्रं शतं वा कार्यान्नरूपो जप ॥ कांसोस्मितामिति ऋचं प्रतिश्लोकम्पठेत् लक्ष्मीः·

॥ चं ॥
॥१०२॥

सर्वाबाधाप्रशमनम्.०॥ लक्षंजप॥ श्लोकोक्तम्फलम्॥ इत्थंयन्नायदेतिलक्षंमहामारीशान्तिः
ततोवद्रेत्पोराज्यमित्यमित्यरिम्पः स्वराज्यमुनर्लभेत्॥ हिनाम्नेरेम्पतेजोसिइतिवलिदानंसदी
पंकुर्यात् बालग्रहशान्तिः॥ घराराम्भावध्रीयात्॥ सर्वाबाधेतिश्लोकेवैरिविनाशनंरोगविनमि
त्यादियथाकाममूहः कार्यः॥ निग्रहेतुएतस्माग्रेएवमुक्तेतिश्लोकम्पठेत्॥ प्रयोगावारान्हांतं
चे॥ बराईपाठफलंनेदविश्चराफ्वगदन्तोमम॥ एकाव्रतादिपाठानांयथावत्कथयामिते॥१
संकल्पपूर्वमम्भ्रजन्यस्माद्रेवमनन्न मकृत्.॥ पाठाद्वलिप्रदानाद्वासिद्धिमाप्नोतिमाधव॥२
उपसर्गोपशान्त्यर्थत्रिराव्रतम्पठेन्नरः॥ ग्रहोपशान्तौकर्तव्यम्पंचावृत्तम्वरानने.॥३॥ महाभये

राम:॥
॥१०२॥
102

॥ वं· ॥
॥ १०३ ॥

समुत्पन्ने समसाहस्त्रं समपन्नयेत् ॥ नवाहस्त्राभवे छान्तिर्वीजपेयफलं लभेत् ॥ ४ ॥ राजवस्यायभूत्ये
च रुद्रसाहस्त्रमुदीरयेत् ॥ अर्कसहस्त्रैः कार्यसिद्धिर्वैरहानिस्तुजायते ॥ ५ ॥ मन्वाहस्त्रापमान्वश्यपत्न
याःस्त्रीवशतामियात् ॥ सौख्यमं वरुसाहस्त्राभिष्यमाप्नोतिमानवः ॥ ६ ॥ कलाहस्त्राद्युत्रपोत्रधनधा
न्यागमं विदुः ॥ राज्ञांभीतिविमोक्षायवैरस्योच्चाटनायच ॥ ७ ॥ कुर्यान्तसप्तस्साहस्त्रं तथाप्टारकम्मि
ये ॥ महाभ्रशाविमोक्षायविंशाहस्त्रं पठेत्सुधीः ॥ ८ ॥ पंचविंशावर्त्तनात्तुम्यवेदंधविमोक्षणम् ॥ संकटे
समनुप्राप्ते दुश्चिकित्स्यामयेतथा ॥ ९ ॥ जातिध्वंसेकुलोच्छेदे आयुषोनाशआगते ॥ वैरिवृद्धौव्याधिवृ
द्धौधननाशेतथाक्षये ॥ १० ॥ तथात्रिविधमुत्पातेतथा चैवातिपातके ॥ कुर्य्याद्यत्नाच्छताहस्त्रं ततः संपद्य
ते शुभम् ॥ ११ ॥ इति दुर्गापाठपठ
न विधानं सम्पूर्णम् ॥ ॥ ॥ ॥

॥ रामः
॥ १०३

CC-0. In Public Domain. Digitization by eGangotri

[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu